# BHAGAVAT GITA AND ARTHA SASTHRA

## BA SANSKRIT

## V SEMESTER

## Core Course
## (2011 Admission)

**UNIVERSITY OF CALICUT**

**SCHOOL OF DISTANCE EDUCATION**

**CALICUT UNIVERSITY P.O., THENJIPALAM, MALAPPURAM, KERALA -673635**

**UNIVERSITY OF CALICUT**

**SCHOOL OF DISTANCE EDUCATION**

**Study Material**

**BA SANSKRIT**

**V Semester**

**CORE COURSE**

*BHAGAVATGITA* AND ARTHASASTHRA

Prepared by :

Dr.V.K.Vijayan
Associate Professor
Department of Sanskrit,
Sree Kerala Varma College,
Thrissur.

Edited and Scrutinised by :

Dr.Jayanarayanan.K.,
Associate Professor,
Sree Kerala Varma College,
Thrissur.

Lay out and Settings:

Computer Section, SDE.

©
Reserved

SK5 B09

**B.A. DEGREE PROGRAMME SANSKRIT**
**SEMESTER - V**
**CORE COURSE - IX**
**BHAGAVADGITHA AND ARTHASASTRA**

**Credits : 4** **Instructional Hours : 90**

**Aim of the course**

This course aims at introducing two masterpieces of Sanskrit Literature - Bhagavadgita and arthasastra to the students. Both texts are great works on crisis management and state craft.

**Objectives of the Course**

To enable the students to understand Bhagavadgita, the great philosophical text.
To introduce ancient state craft and management principles through the study of Arthasastra.
To make students capable of crisis management.

**Course Outline :-**

**Module I**

Bhagavadgita - Chapter III

**Module II**

Arthasastra of Kautilya - Vinayadhikaranam. Segments 1 to 7.

**Module III**

Arthasastra - Vinayadhikaranam - Segments 8 to 13.

**Module IV**

Arthasastra - Vinayadhikaranam - Segments - 14 to 18.

**Essential reading**

1. Bhagavadgita
2. Arthasastra - Kautilya - Vinayadhikaranam

**Additional Reading**

1. Indian Traditions of Management Ed. Dr. N.V.P. Unithir.
2. Holy Geetha - Swami Chinmayananda.
3. Arthasastra - Malayalam Translation by K.V.M.
4. Bhagavadgita - with Sankarabhashyam.

# भगवद्गीता - तृतीयोऽध्याय:।

अर्जुन उवाच

1. ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।

तत् किं कर्मणि घोरे मां नियोजयसि केशव।।

पदच्छेद:- ज्यायसी चेत् कर्माण: ते मता बुद्धि: जनार्दन। तत् किं कर्मणि धोरे मां नियोजयसि केशव।।

अन्वय:- हे जनार्दन, कर्मण: बुद्धि: ज्यायसी इति ते मता चेत्, तत् किं मां धोरे कर्मणि नियोजयसि।

भावार्थ:- हे कृष्ण, कर्मयोगात् ज्ञानयोग एव श्रेष्ठ इति भवत: अभिमत: चेत् किमर्थं ज्ञानात् निकृष्टे हिंसात्मके कर्मणि मां प्रेरयसि, इति अर्जुन: कृष्णं पृच्छति। भक्तं मां त्वं किमर्थं योग्यात् अर्थात् निवार्य अयोग्ये अर्थे नियोजयसि इत्यर्थ:।

2. व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।

तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्।।

पदच्छेद:- व्यामिश्रेण इव वाक्येन बुद्धिं मोहयसि इव मे। तत् एकं वद निश्चित्य येन श्रेय: अहं आप्नुयाम्।।

अन्वय:- व्यामिश्रेण इव वाक्येन मे बुद्धिं मोहयसि इव। तत् एकं निश्चित्य वद येन अहं श्रेय: आप्नुयाम्।

भावार्थ:- प्रथमं तावत् 'कर्मण्येवाधिकारस्ते' इत्यनेन कर्मण: तत: 'बुद्धौ शरणमन्विच्छ' इत्यनेन ज्ञानस्य च प्राधान्यं विवृण्वता त्वया मम बुद्धि: नितरां मोहात्मिका कृता। ज्ञानकर्मयोगयो: कतर: स्वीकार्य इति अहं विमूढात्मा संजात:। तस्मात् ज्ञानकर्मणो: कतर: मे परपुरुषार्थप्राप्तये सार्थक: भवेदिति निश्चित्य वदितुं अर्हसि।

श्रीभगवान् उवाच:-

3. लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।

ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।।

पदच्छेद:- लोके अस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया अनघ। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्।।

अन्वय:- हे अनध, अस्मिन् लोके मया द्विविधा निष्ठा पुरा प्रोक्ता। संख्यानां ज्ञानयोगेन योगिनां कर्मयोगेन इति।

भावार्थ:- अर्जुनस्य वाचं निशम्य भगवान् कृष्ण: एवं प्रतिवक्तुं आरेभे। हे, निष्पाप, अस्मिन् लोके मुभुक्षूणां पुरा वेदरूपिणा सर्वधर्मोपदेष्ट्रा द्विप्रकारा शास्त्रीयानुष्ठानस्थिति: व्यवस्थापिता भवति। सांख्यानां ज्ञानयोगेन मोक्षप्राप्ति: कर्मयोगिनां अर्थात् गृहिणां कर्मयोगेन अभ्युदय: विन्दते इति।

4. न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।

न च संन्यसनादेव सिद्धिं समधिगच्छाति।

पदच्छेद:- न कर्मणां अनारम्भात् नैष्कर्म्यं पुरुष: अश्नुते। न च संन्यसनात् एव सिद्धिं समधिगच्छति।

अन्वय:- कर्मणां अनारम्भात् नैष्कर्म्यं पुरुष: न अश्नुते। न च संन्यसनादेव सिद्धिं समधिगच्छति।

भावार्थ: - श्रैतादीनां कर्मणां अनाचरणात् निष्कर्मतां पुरुष: न अनुभवति। उपायभूतानां कर्मणां अनाचरणात् उपेयभूतं ज्ञानं तत्फलरूपं नैष्कर्म्यं च पुरुष: न सिध्यति। अपि च कमणां संन्यसनात् अर्थात् त्यागात् नैष्कर्म्यसिद्धिं न समधिगच्छति।

5. न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।

कार्यते ह्यवश: कर्म सर्व: प्रकृतिजै: गुणै:।।

पदच्छेद:- न हि कश्चित् क्षणं अपि जातु तिष्ठति अकर्मकृत्। कार्यते हि अवश: कर्म सर्व: प्रकृतिजै: गुणै:।

अन्वय:- कश्चित् जातु क्षणमपि अकर्मकृत् न तिष्ठति हि। सर्व: प्रकृतिजै: गुणै: अवश: कर्म कार्यते हि।

भावार्थ:- अस्मिन् लोके कदाचिदपि यो वा को वा प्राणी क्षणमपि किमपि कर्म अकुर्वन्न निष्ठति। सर्वदा कायेन वा मनसा व वाचा वा यत्किञ्चित् कर्म कुर्वन्नेव तिष्ठति। सर्वोऽपि प्राणिवर्ग: सत्वरजस्तमोरूपेभ्य: गुणेभ्य: संजात:। अत: ते प्रकृतिजै: गुजै: अस्वतन्त्राश्च भवन्ति। एवं प्रकृतिजानां गुणानां स्वाधीने तिष्ठन्त एव सर्वं कर्म कुर्वन्ति इति।

6. कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।

इन्द्रियार्थान्विमूढात्मा मिथ्याचार: स उच्यते।।

पदच्छेद: - कर्मेन्द्रियाणि संयम्य य: आस्ते मनसा स्मरन्। इन्द्रियाथान् विमूढात्मा मिथ्याचार: स: उच्यते।।

अन्वय:- य: विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते स: मिथ्याचार: उच्यते।

भावार्थ:- कार्याकार्यविवेकराहित: य: बाह्यकर्मेन्द्रियाणि निरूद्ध्य अन्तरिन्द्रियार्थान् चिन्तयन् आस्ते स: कपटसदाचार: आत्मवञ्चक: भवति इति सतां मतम्।।

7. यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।

कर्मेन्द्रियै: कर्मयोगमसक्त: स विशिष्यते।।

पदच्छेद:- य: तु इन्त्रियाणि मनसा नियम्य आरभते अर्जुन। कर्मेन्द्रियै: कर्मयोगं असक्त: स विशिष्यते।।

अन्वय:- तु, हे अर्जुन य: मनसा इन्द्रियाणि नियम्य असक्त: कर्मेन्द्रियै: कर्मयोगं आरभते स विशिष्यते।

भावार्थ:- हे अर्जुन अनात्मज्ञ: मुमुक्षु: चक्षुरादीनीन्द्रियाणि अन्त: नियम्य स्वयं अनासक्त: भूत्वा कर्मेन्द्रियै: सश्रद्धं श्रौतस्मार्तादि कर्म आरभते चेत् स: श्रेष्ठ: भवति।

8. नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मण:

शरीरयात्रपि च ते न प्रसिद्ध्येदकर्मण:।।

परच्छेद:- नियतं कुरु कर्म त्वं कर्म ज्याय: हि अकर्मण:। शरीरयात्रा अपि च ते न प्रसिद्ध्येत् अकर्मण:।

अन्वय:- त्वं नियतं कर्म कुरु। हि अकर्मण: कर्म ज्याय:। अकर्मण: ते शरीरयात्रा अपि न प्रसिद्ध्येत् च।

भावार्थ:- यद्यापि संन्यासस्यैव सर्वोत्कृष्टतमत्वं श्रूयते तथापि विध्युक्तं कर्मकरणं ईश्वरप्रीत्यर्थं चित्तशुद्ध्यर्थं च कुरु। कर्मकरणं सर्वथा अकर्मण: श्रेयस्करं भवति। निश्शेषकर्मपरित्यागात् ते शरीरपरित्राणं अपि न सिध्येत्। कर्मानुष्ठानादेव जीवितयात्रा सफला, भवेदित्यर्थ:।

9. यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धन:।

तदर्थं कर्म कौन्तेय मुक्तसङ्ग: समाचर।।

पदच्छेद:- यज्ञार्थात् कर्मण: अन्यत्र लोक: अयं कर्मवन्धन:। तदर्थं कर्म कौन्तेय मुक्तसङ्ग: समाचर।

अन्वय:- हे कौन्तेय यज्ञार्थात् कर्मण: अन्यत्र अयं लोक: कर्मबन्धन:। तदर्थं मुक्तसङ्ग: कर्म समाचर।

भावार्थ:- हे अर्जुन यज्ञार्थत्कर्मण: अर्थात् ईश्वरप्रीतिहेतो: अन्यत्र काम्यकर्मणि अयं लोक: कर्मबन्ध: भवति। तस्मात् त्वं ईश्वरप्रीन्यर्थं अवश्यं फलेच्छारहित: भूत्वा कर्म अनुतिष्ठ।।

10. सहयज्ञा: प्रजा: सृष्ट्वा पुरोवाच प्रजापति:।
अनेन प्रसविष्यध्वं एष वोऽस्त्विष्टकामधुक्।।

पदच्छेद: - सहयज्ञा: प्रजा: सृष्ट्वा पुरा उवाच प्रजापति:। अनेन प्रसविष्यध्वं एष व: अस्तु इष्टकामधुक्।।

अन्वय:- पुरा प्रजापति: सहयज्ञा: प्रजा: सृष्ट्वा उवाच। अनेन प्रसविष्यद्वम्। एष व: इष्टकामधुक् अस्तु।।

भावार्थ:- सर्गादौ ब्रह्मा यज्ञै: सह चतुर्वर्णान्तर्गता: प्रजा: सृष्ट्वा ता: प्रजा: उवाच। यूयं अनेन यज्ञकर्मणा देवानां प्रीतिमुत्पाद्य वृद्धिं लभध्वम्। एष: यज्ञ: भवतां कामानां फलदोग्धा भवेत् इति।

11. देवान्भावयतानेन ते देवा भावयन्तु व:।
परस्परं भावयन्त: श्रेय: परमवाप्स्यथ।।

पदच्छेद:- देवान् भावयत अनेन। ते देवा: भावयन्तु व:।। परस्परं भावयन्त: श्रेय: परं अवाप्स्यथ।।

अन्वय:- अनेन देवान् भावयत। ते देवा: व: भावयन्तु। परस्परं भावयन्त: (यूयं) परं श्रेय: अवाप्स्यथ।

भावार्थ:- यज्ञरूपेण अनेन कर्मानुष्ठानेन भवन्त: देवान् सन्तोषयन्तु। एवं यज्ञादिभि: कर्माभि: सन्तुष्टा: देवा: भवन्त: अपि सन्तोषयन्तु। एवं परस्परं सन्तोषयन्त: यूयं देवानां प्रसादेन सत्वशुध्या सम्यक् ज्ञानं अवाप्य निरतिशयं श्रेय: अवाप्स्यथ। अत्र सम्भावनायामेव परस्परपदसम्बन्ध:, नतु श्रेय: प्राप्ताविति अवगन्तव्यम्।।

12. इष्टान्भोगान्हि वो देवा दास्यन्ते यज्ञभाविता:।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव स:।।

पदच्छेद:- इष्टान् भोगान् हि व: देवा: दास्यन्ते यज्ञभाविता:। तै: दत्तान् अप्रदाय एभ्य: य: भुङ्क्ते स्तेन: एव स:।

अन्वय:- यज्ञभाविता: देवा: व: इष्टान् भोगान् दास्यन्ते हि। य: तै: दत्तान् एभ्य: अप्रदाय भुङ्क्ते स: स्तेन: एव।।

भावार्थ:- श्रौतस्मार्तकर्मभि: आराधिता: देवा: युष्मभ्यं हितकराणि सुखसाधनानि प्रदेययेयु:। य: कश्चन पुरुष: देवै: एवं दुत्तान् सुखान् तेभ्य: असमर्प्य स्वयमेव अनुभवति स: चोर एव भवति।।

13. यज्ञशिष्टाशिन: सन्तो मुच्यन्ते सर्वकिल्बिषै:।
भुञ्जते ते त्वधं पापा: ये पचन्त्यात्मकारणात्।।

पदच्छेद:- यज्ञशिष्टाशिन: सन्त: मुच्यन्ते सर्वकिल्बिषै:। भुञ्जते ते तु अधं पापा: ये पचन्ति आत्मकारणात्।।

अन्वय:- यज्ञशिष्टाशिन: सर्वकिलिबषै: मुच्यन्ते। ये आत्मकारणात् पचन्ति, ते पापा: तु अधं भुञ्जते।

भावार्थ:- श्रुत्युक्तपञ्चमहायज्ञाननुष्ठाय तच्छेषान्नभोजिन: सर्वेभ्योऽपि पापेभ्यो मुच्यन्ते। ये केचित् स्वार्थलाभाय कर्म कुर्वन्ति ते पापिन: कर्मफलरूपेण पापं अनुभवन्ति।।

14. अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभव:।
यज्ञाद्भवति पर्जन्यो यज्ञ: कर्मसमुद्भव:।।

पदच्छेद:- अन्नात् भवन्ति भूतानि पर्जन्यात् अन्नसंभव:। यज्ञात् भवति पर्जन्य:, यज्ञ: कर्मसमुद्भव:।

अन्वय:- भूतानि अन्नात् भवन्ति। अन्नसम्भव: पर्जन्यात्। पर्जन्य: यज्ञात् भवति। यज्ञ: कर्मसमुद्भव:।।

भावार्थ:- सर्वाण्यपि जन्तुजातानि अन्नात् जायन्ते। अन्नस्य उद्भव: मेघात् भवति। मेधस्तु यज्ञात् जायते। यज्ञस्तु कर्मण: संजायते।

15. कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।

तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।।

पदच्छेद्:- कर्म ब्रह्मोद्भवं विद्धि। ब्रह्म अक्षरसमुद्भवम्। तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।।

अन्वय:- कर्म ब्रह्मोद्भवं विद्धि। ब्रह्म अक्षरसमुद्भवम्। तस्मात् सर्वगतं नित्यं ब्रह्म यज्ञे प्रतिष्ठितम्।।

भावार्थ:- यज्ञकारणभूतं यत् कर्म तत् ब्रह्मोद्भवं जानीहि। तच्च ब्रह्म अक्षरसमुद्भवं विद्धि। यज्ञैकमूलात् जगदुत्पत्ति: स्थितिश्च। तस्मात् सर्वगतं ब्रह्म यज्ञे अर्थात् ब्राह्मणादिभि: कर्तव्ये कर्मण्येव प्रतिष्ठितं नित्यं भवति। वर्णाश्रमिणां कर्तव्यत्वेन कर्माणि वेद एव विदधाति इत्यर्थ:।।

16. एवं प्रवर्तितं चक्रं न नानुवर्तयतीह य:।

अघायुरिन्द्रियारामो मोधं पार्थ स जीवति।

पदच्छेद:- एवं प्रवर्तितं चक्रं न अनुवर्तयति इह य:। अधायु: इन्द्रियाराम: मोधं पार्थ स: जीवति।

अन्वय:- हे पार्थ, य: एवं प्रवर्तितं चक्रं इह न अनुवर्तयति अधायु: इन्द्रियाराम: स: मोघं जीवति।

भावार्थ:- तदिदं ईश्वरप्रवर्तितं नियमबद्धं यज्ञचक्रं य: न अनुतिष्ठति, ईश्वरशासनं निरस्य स्वयं इन्द्रियार्थेष्वेव व्याप्रियते पापायुष: तस्य जीवितं निष्प्रयोजनं भवति इत्यर्थ:।

17. यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानव:।

आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते।।

पदच्छेद:- य तु आत्मरति: एव स्यात् आत्मतृप्त: च मानव: आत्मनि एव च सन्तुष्ट: तस्य कार्यं न विद्यते।

अन्वय:- य: मानव: तु आत्मरति: एव आत्मतृप्त: च आत्मानि एव सन्तुष्ट: च स्यात् तस्य कार्यं न विद्यते।

भावार्थ:- य: ब्रह्मवित् सदा आत्मन्येव विहरति, किंच आनन्दैकरसेन पूर्णेन आत्मना तृप्त:, चिदानन्दरसे आत्मन्येव सन्तुष्ट: च भवेत् तस्य आत्मारामस्य कृतकृत्यस्य यते: कर्तव्यं किमपि न भवतीत्यर्थ:।

18. नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन।

न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रय:।।

पदच्छेद:- न एव तस्य कृतेन अर्थ: न अकृतेन इह कश्चन। न च अस्य सर्वभूतेषु कश्चित् अर्थव्यपाश्रय:।।

अन्यय:- तस्य कृतेन अर्थ: न एव। इह अकृतेन कश्चन न । अस्य सर्वभूतेषु कश्चित् अर्थव्यपाश्रय: च न।।

भावार्थ:- तस्य स्थितप्रज्ञस्य अनुष्ठितेन कर्मणा प्राप्तव्य: अर्थ कश्चिदपि नास्ति। तथापि ब्रह्मविद: विहितकर्मणां अनाचरणेन न कोऽप्यनर्थ: लोके संभवति। तस्य ब्रह्मविद सर्वभूतेषु आश्रयणीय: कश्चिदपि नास्ति।

19. तस्मादसक्त: सततं कार्यं कर्मं समाचर।

असक्तो ह्याचरन्कर्म परमाप्नोति पूरुष:।।

पदच्छेद:- तस्मात् असक्तः सततं कार्यं कर्म समाचर। असक्तः हि आचरन् कर्म परं आप्नोति इति पूरुष।।

अन्वयः - तस्मात् असक्तः सततं कार्यं कर्म समाचर। हि असक्तः कर्म आचरन् पूरुषः परं आप्नोति।

भावार्थः- पुरुषः स्वयमसक्तः फलेच्छारहितः सन् कर्म समनुतिष्ठन् मोक्षमाप्नोति। तस्मात् हे अर्जुन त्वमपि निष्कामः सन् सततं कर्तव्यं कर्म समाचर।

20. कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि।।

पदच्छेदः- कर्मणा एव हि संसिद्धिं आस्थिताः जनकादयः। लोकसंग्रहं एव अपि संपश्यन् कर्तुं अर्हसि।।

अन्वयः- जनकादयः कर्मणा एव संसिद्धिं आस्थिताः हि। लोकसंग्रहं एव संपश्यन् अपि कुर्तुं अर्हसि।।

भावार्थः- मिथिलाधिपः जनक : लौकिकं कर्म अनुतिष्ठन्नेव चित्तशुद्धिमुपलभ्य ब्रह्मज्ञत्वमवाप्तवान्। सत्कर्ममार्गं प्रदर्श्य एव साधारणानां जनानां उन्मार्गान्निवारणं इति संपश्यन् मया क्रियामाणं कर्म लोकहिताय भवतीति अर्थः।

21. यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

पदच्छेदः- यत् यत् आचरति श्रेष्ठः तत् तत् एव इतरः जनः। सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते।।

अन्वयः- श्रेष्ठः यत् यत् आचरति इतरः जनः तत् तत् एव। सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते।

भावार्थः- वेदवेदाङ्गज्ञानेन तदनुसारं कर्मानुष्ठानेन जनानां आदरपात्रभूतः कश्चित् पुरुषः यत् यत् आचरति इतरः पामरः अपि तदेव कर्म आचरति। एवं पूर्वोक्तप्रकारः श्रेष्ठः पुरुषः यत् यत् शास्त्रं प्रभाणीकरोति इतरः जनः तत्प्रमाणीकृतमेव कार्यं शास्त्रत्वेनाङ्गीकरोति।

22. न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि।।

पदच्छेदः- न मे पार्थ अस्ति कर्तव्यं त्रिषु लोकेषु किञ्चन। न अनवाप्तं अवाप्तव्यं वर्ते एव च कर्मणि।

अन्वयः- हे पार्थ, मे त्रिषु लोकेषु कर्तव्यं किञ्चन न अस्ति। अनवाप्तं अवाप्तव्यं न अस्ति। कर्मणि एव वर्ते च।

भावार्थः- हे अर्जुन अवाप्तसर्वकार्यस्य सर्वेश्वरस्य मे कर्तव्यं कर्म नास्ति। त्रिषु लोकेषु मया अनवाप्तं आप्तव्यं वा वस्तु किञ्चिदपि नास्ति। तथापि लोकसंग्रहात्मके कर्मणि वर्ते इति।

23. यादि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।।

पदच्छेदः- यदि हि अहं न वर्तेयं जातु कर्मणि अतन्द्रितः। मम वर्त्म अनुवर्तन्ते मनुष्याः पार्थ सर्वशः।।

अन्वयः- हे पार्थ, हि अहं जातु अतन्द्रितः कर्मणि न वर्तेयं यदि मनुष्याः सर्वशः मम वर्त्म अनुवर्तन्ते।

भावार्थः- हे अर्जुन अहं क्वचित्कदाचिदपि अप्रमत्तो भूत्वा विहितकर्मकर्ता न स्यां चेत् मां अकर्माणं दृष्ट्वा सर्वे मनुष्याः सर्वप्रकारेण मां अनुतिष्ठेरन्।

24. उत्सीदेयुरिमं लोका न कुर्यां कर्म चेदहम्।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः।।

पदच्छेदः- उत्सीदेयुः इमं लोका न कुर्यां कर्म चेत् अहम्। संकरस्य च कर्ता स्यां उपहन्यां इमाः प्रजाः।।

अन्वयः- अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः। संकरस्य कर्ता स्याम्। इमाः प्रजाः उपहन्यां च।।

भावार्थः- हे अर्जुन यदि अहं कर्म न कुर्यां तर्हि सर्वस्यापि जगतः अनर्थः संजायेत। वैदिकं कर्म त्याजयित्वा यदि अहं तत्तद्वर्णभेदव्यवस्थापककर्माभावेन वर्णसंकरस्य कर्ता स्यां तर्हि सांकर्यकरणेन अहं सर्वेषामपि जनानां दुर्गतिप्रापकः भवेयम्।

25. सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्।।

पदच्छेदः- सक्ताः कर्मणि अविद्वांसः यथा कुर्वन्ति भारत। कुर्यात् विद्वान् तथा असक्तः चिकिर्षुः लोकसंग्रहम्।।

अन्वयः- हे भारत, अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति लोकसंग्रहं चिकीर्षुः विद्वान् तथा असक्तः कुर्यात्।

भावार्थः- हे अर्जुन, अनात्मज्ञाः कर्मफले सक्ताः यथा कर्म कुर्वन्ति, फलापेक्षारहितः विद्वान् लोकहिते तथा असक्तः सन् कर्म करोति।।

26. न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्।।

पदच्छेदः- न बुद्धिभेदं जनयेत् अज्ञानां कर्मसङ्गिनाम्। जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचर।।

अन्वयः- विद्वान् कर्मसङ्गिनां अज्ञानां बुद्धिभेदं न जनयेत्। युक्तः समाचरन् सर्वकर्माणि जोषयेत्।

भावार्थः- आत्मज्ञानी कर्मासक्तानां मूढानां संशयं अतत्वज्ञानं वा न जनयेत्। तथा च परमात्मस्वरूपतया स्थित्वा सर्वकर्माणि सम्यक् अनुतिष्ठन् प्रीणयेत्।

27. प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते।।

पदच्छेदः- प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ता अहं इति मन्यते।।

अन्वयः- सर्वशः कर्माणि प्रकृतेः गुणैः क्रियमाणानि। अहंकारविमूढात्मा अहं कर्ता इति मन्यते।।

भावार्थः- सर्वथा कर्माणि प्रकृतिगुणभूतैः देहेन्द्रियादिभिः क्रियमाणानि भवन्ति। देहेन्द्रियादिषु अहंकारेण विमोहितचित्तः अहं कर्मणां कर्ता इति मन्यते।।

28. तत्ववित्तु महाबाहो गुणकर्मविभागयोः।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते।।

पदच्छेदः- तत्ववित् तु महाबाहो गुणकर्मविभागयोः गुणाः गुणेषु वर्तन्ते इति मन्वा न सज्जते।।

अन्वयः- हे महाबाहो, गुणकर्मविभागयोः तत्ववित् तु गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते।

भावार्थः- हे अर्जुन, गुणकर्मविभागयोः उपरि तथात्मनश्च तत्वं विजानन् इन्द्रियगुणानां विषयगुणानां भोगो भवति कर्म इति विचिन्त्य अहं कर्मभिः सक्तः न जाये।

29. प्रकृतेर्गुणसंमूढां सज्जन्ते गुणकर्मसु।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्।।

पदच्छेदः- प्रकृतेः गुणसंमूढां सज्जन्ते गुणकर्मसु। तान् अकृत्स्नविदः मन्दान् कृत्स्नवित् न विचालयेत्।।

अन्वय:- प्रकृते: गुणसंमूढ: गुणकर्मसु सज्जन्ते। अकृत्सनविद: मन्दान् तान् कृत्स्नवित् न विचालयेत्।।

भावार्थ:- प्रकृते: गुणेषु देहेन्द्रियादिषु विभूढा: श्रवणादिभि: वागादिभि: च क्रियमाणेषु कर्मसु सक्ता: भवन्ति। एतान् अब्रह्मविद: अज्ञान् ब्रह्मवित् न विचालयत्।

30. मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा।
निशशीर्निर्ममो भूत्वा युध्यस्व विगतज्वर:।।

पदच्छेद:- मयि सर्वाणि कर्माणि संन्यस्य अध्यात्मचेतसा। निराशी: निर्भय: भूत्वा युध्यस्व विगतज्वर:।।

अन्वय:- सर्वाणि कर्माणि मयि संन्यस्य अध्यात्मचेतसा निराशी: निर्भय: विगतज्वर: भूत्वा युध्यस्व।

भावार्थ:- मनसा इन्द्रियै: शरीरेण च क्रियमाणानि सर्वाणि कर्माणि मयि समर्प्य आत्मसाक्षात्कारं मनसि निधाय लौकिककामान् हित्वा ममतां विहाय शोकमुपेक्ष्य त्वत्कर्मभूतं युद्धं कुरु।।

31. ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवा:।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभि:।।

पदच्छेद:- ये मे मतं इदं नित्यं अनुतिष्ठन्ति मानवा: श्रद्धावन्त: अनसूयन्त: मुच्यन्ते ते अपि कर्मभि:।।

अन्वय:- ये मानवा: श्रद्धावन्त: अनसूयन्त: मे इदं मतं अनुतिष्ठन्ति, ते अपि कर्मभिः मुच्यन्ते।

भावार्थ:- ये विवेकिन: ब्राह्मणादय: मम कर्मसु श्रद्धां भक्तिं च कुर्वन्त: असूयारहिता: मां अनुसरन्ति ते अपि चित्तसुद्धिं प्राप्य पुण्यापुण्यहेतुभि: दुःखकारिभि: कर्मभि: विभुच्यन्ते।।

32. ये त्वेदतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्वज्ञानविभूढांस्तान्विद्धि नष्टानचेतस:।।

पदच्छेद:- ये तु एतद् अभ्यसूयन्त: न अनुतिष्ठन्ति मे मतम्। सर्वज्ञानविभूढान् तान् विद्धि नष्टान् अचेतस:।।

अन्वय:- ये तु मे मतं अभ्यसूयन्त: न अनुतिष्ठन्ति सर्वज्ञानविमूढान् अचेतस: तान् नष्टान् विद्धि।

भावार्थ:- ये तु अविवेकिन: एतदुक्तं मम मतं अत्यन्तं दूषयन्तः दुराग्रहात् मदाज्ञां अननुसरन्त: बुद्धिरहिता: सत्यासत्याविवेकिन: तान् संन्यासानर्हान् विनष्टान् जानीहि। अर्थात् स्वधर्मं परित्यज्य परधर्मे वर्तमाना: स्वयमेव विनश्येयु: इति।

33. सहशं चेष्टते स्वस्या: प्रकृतर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रह: किं करिष्यति।।

पदच्छेद:- सहशं चेष्टते स्वस्या: प्रकृते: ज्ञानवान् अपि। प्रकृतिं यान्ति भूतानि निग्रह: किं करिष्यति।

अन्वय:- ज्ञानवान् अपि स्वस्या: प्रकृते: सहशं चेष्टते। भूतानि प्रकृतिं यान्ति। विग्रह: किं करिष्यति।।

भावार्थ:- जितेन्द्रिय: ब्रह्मविदपि प्रकृते: वासनाया: सहशं कर्म करोति। एवं ब्रह्मविद: अपि प्रकृत्यनुवर्तित्वे अन्येषां भूतानां का कथा। सर्वे प्राणिन: स्वस्वजात्यनुरूपेण वासनात्मिकां प्रकृतिं अनुगच्छन्ति। एवं प्रकृत्यधीना: न कथञ्चिदपि तुष्णीं स्थातुं शक्नुवन्ति। अत: हठेन निर्बद्धबुध्या क्रियमाण: इन्द्रियनिग्रह: सर्वथा निष्फल एव भवति इति।

34. इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।

तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ।।

पदच्छेद:- इन्द्रियस्य इन्द्रियार्थे रागद्वेषौ व्यवस्थितौ। तयो: न वशं आगच्छेत् तौ हि अस्य परिपन्थिनौ।।

अन्वय:- इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ। तयो: वशं न आगच्छेत्। हि तौ अस्य परिपन्थिनौ।।

भावार्थ:- सामान्यत: सर्वेषामिन्द्रियाणां प्रतिविषयं इष्टे राग: अनिष्टे द्वेषश्च नियमेन वर्तते। मुमुक्षु: न कदापि इष्टानिष्टयो: पात्रं भवेत्। कुत इति चेत् एतौ रागद्वेषौ ज्ञानस्य प्रतिबन्धकौ भवत:।

35. श्रेयान्स्वधर्मा विगुण: परधर्मात्स्वनिष्ठितात्।

स्वधर्मे निधनं श्रेय: परधर्मो भयावह:।।

पदच्छेद:- श्रेयान् स्वधर्म: विगुण: परधर्मात् स्वनिष्ठितात्  स्वधर्मे निधनं श्रेय: परधर्म: भयावह:।।

भावार्थ:- सम्यक् नियमेनानुष्ठितात् परधर्मात् विपरीतगुणयुक्तोऽपि स्वधर्म: श्रेष्ठतर: भवति। किंच परधर्मं परित्यज्य स्वल्पे स्वधर्मे नियमेन वर्तमानस्य मरणमपि श्रेयसे भवति। सम्यगनुष्ठितोऽपि परधर्म: भयजनक: भवति।

अर्जुन उवाच।

36. अथ केन प्रयुक्तोऽयं पापं चरति पूरुष:।

अनिच्छन्नपि वार्ष्णेय बलादिव नियोजित:।।

पदच्छेद:- अथ केन प्रयुक्त: अयं पापं चरति पूरुष:। अनिच्छन् अपि वार्ष्णेय बलात् इव नियोजित:।।

अन्वय:- हे वार्ष्णेय, अथ अयं पूरुष:  अनिच्छन् अपि केन प्रयुक्त: बलात् नियोजित इव पापं चरति।।

भावार्थ:- हे भगवन् कृष्ण, एवं सति अयं मनुष्य: अनभिलषन् अपि केन प्रेरित: बलात्कारेण नियोजित इव पापं करोति।

37. श्रीभगवानुवाच

काम एष क्रोध एष रजोगुणसद्भव:।

महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्।।

पदच्छेद:- काम: एष: क्रोध: एष: रजोगुणसमुद्भव:। महाशन: महापाप्मा विद्धि एनं इह वैरिणम्।।

अन्वय:- एष: रजोगुणसमुद्भव: काम: एष: क्रोध:, महाशन: महापाप्मा एनं इह वैरिणं विद्धि।

भावार्थ:- य: रजोगुणसमुद्धव: रजोगुणसंवर्धक: च काम: स: एव मनुष्यं बलात्कारेण पापकर्मणि नियोजयति। एष काम एव प्रतिबद्धे क्रोधात्मना परिणमते। महाशन: महापाप्मा अयं काम: मुमुक्षो: वैरी इति जानीहि।

38. धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।

यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्।।

पदच्छेद:- धूमेन अव्रियते वह्नि: यथा आदर्श: मलेन च। यथा उल्बेन आवृत: गर्भ: तथा तेन इदं आवृतम्।।

अन्वय:- वह्नि: धूमेन, आदर्श: मलेन च यथा आव्रियते, गर्भ: यथा उल्बेन आव्रियते तथा इदं तेन आवृतम्।।

भावार्थ:- प्रकाशस्वरुप: अग्नि: यथा धूमेन अवृत: भवति, बिम्बप्रकाशक: आदर्श: यथा धूलिभि: आच्छाद्यते गर्भस्थ: शिशु: यथा उल्बेन आव्रियते तथा पूर्वोक्तेन कामेन मनुष्यस्य ज्ञानं तिरोहितं भवति।

39. आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।

कामरूपेण कौन्तेय दुष्पूरेणानलेन च।।

पदच्छेदः- आवृतं ज्ञानं एतेन ज्ञानिनः नित्यवैरिणा। कामरूपेण कौन्तेय दुष्पूरेण अनलेन च।

अन्वयः- हे कौन्तेय दुष्पूरेण अनलेन च ज्ञानिनः नित्यवैरिणा एतेन कामरूपेण ज्ञानं आवृतम्।।

भावार्थः- हे अर्जुन निरन्तरानुभवेनापि न तृप्तिदायकेन कामितस्य अप्राप्तौ दुःखसन्दायकेन तथा ज्ञानिनां नित्यशत्रुणा पूर्वोक्तरूपेण कामेन आवृतो भवति आत्मानुभवः।

40. इन्द्रियाणि मनोबुद्धिरस्याधिष्ठानमुच्यते।

एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्।।

पदच्छेदः- इन्द्रियाणि मनः बुद्धिः अस्य अधिष्ठानं उच्यते। एतैः विमोहयति एषः ज्ञानं आवृत्य देहिनम्।।

अन्वयः- इन्द्रियाणि मनः बुद्धिः अस्य अधिष्ठानं उच्यते। एषः एतैः ज्ञानं आवृत्य दोहिनं विमोहयति।

भावार्थः- चक्षुरादीनि इन्द्रियाणि मनः बुद्धिश्च कामस्य आश्रयः भवति। कामः स्वप्रवृत्तेः करणभूताभिः इन्द्रियप्रवृत्तिभिः ज्ञानं तिरोहित्वा ज्ञानिनं अज्ञानिनं च विमोहयति।।

41. तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।

पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।

पदच्छेदः- तस्मात् त्वं इन्द्रियाणि आदौ नियम्य भरतर्षभ। पाप्मानं प्रजहि हि एनं ज्ञानविज्ञाननाशनम्।।

अन्वयः- हे भरतर्षभ तस्मात् त्वं आदौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनं पाप्मानं प्रजहि हि।।

भावार्थः- हे अर्जुन, यतः मुमुक्षोस्तव कामः नित्यशत्रुः तस्मात् त्वं आदौ इन्द्रियाणि ततः मनः बुद्धिं च नियम्य तदनन्तरं ज्ञानविज्ञानयोः विध्वंसकं पापिनं कामं निःशेषं विध्यंसय।।

42. इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।

मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः।।

पदच्छेदः- इन्द्रियाणि पराणि आहुः इन्द्रियेभ्यः परं मनः। मनसः तु परा बुद्धिः यः बुद्धेः परतः तु सः।।

अन्वयः- इन्द्रियाणि पराणि, इन्द्रियेभ्यः परं मनः। मनसः तु परा बुद्धिः, यः तुः बुद्धेः परतः सः।।

भावार्थः- चक्षुरादीनि कर्मेन्द्रियाणि शरीरात् उत्कृष्टतराणि भवन्ति। तथा इन्द्रियेभ्यः मनः उत्कृष्टं भिन्नं च भवति। एवं मनसः अपि बुद्धिः उत्कृष्टा भवति। बुद्ध्या हि मनः तद्धर्माश्च प्रवर्त्यन्ते। सर्वान् अविकारात्मना यः साक्षाज्जानाति स आत्मा बुद्धेः परः भवति। अर्थात् सर्वेभ्योऽप्युत्कृष्टतमः भवति आत्मा नित्यत्वात् सर्वप्रकाशकत्वात् च। अतः एवं सर्वस्मात् परं देहेन्द्रियादिभ्यो भिन्नं चिदानन्दैकरसं परिपूर्णं एतमेव स्वत्मानं विजानीहि।

43. एवं बुद्धेः परं बुद्धा संस्तभ्यात्मानमात्मना।

जहि शत्रुं महाबाहो कामरूपं दुरासदम्।।

पदच्छेदः- एवं बुद्धेः परं बुद्धा संस्तभ्य आत्मानं आत्मना जहि शत्रुं महाबाहो कामरूपं दुरासदम्।।

अन्वयः- हे महाबाहो, एवं बुद्धेः परं बुद्धा आत्माना आत्मानं संस्तभ्य दुरासदं कामरूपं शत्रुं जहि।।

भावार्थः- हे अर्जुन, बुध्यादेः परं आनन्दैकरसं आत्मानं स्वात्मना संस्तभ्य दुर्जयं कामरूपं शत्रुं विध्वंसय। विषयग्रहणं एव कामस्य कारणम्। अतः ज्ञानदृष्ट्या विषयस्य अग्रहणमेव कामविनाशनहेतुः भवति इति।

भगवद्गीतायां तृतीयः अध्यायः समाप्तः

---------------------

# अर्थशास्त्रम्

## विनयाधिकारिकं - प्रथममधिकरणम्।

ॐ नमः शुक्रबृहस्पतिभ्याम्।

ओमिति मङ्गलवाची शब्दः। शुक्रः असुरगुरुः बृहस्पतिः देवगुरुश्च। ताभ्यां नमः आचरति। तावेव हि अर्थशास्त्रस्याचार्येषु प्रथमगणनीयाविति मत्वा एव ताभ्यां प्रति प्रथमं नमस्कारं अर्पयति।

ग्रन्थस्यास्य प्रकरणाधिकरणसमुद्देशं स्थापयितुं भूमिकां विरचयति पृथिव्या इत्यादिना। अलब्धायाः भूमेःलाभाय, लब्धायाः परिरक्षणाय च अर्थशास्त्राणि विरचितानि। शुक्रबृहस्पत्यादिभिः आचार्यैः विरचितानि अर्थशास्त्राणि संगृह्यैव अत्र मया इदं अर्थशास्त्रं विरच्यते। प्रायशः इत्यनेन पूर्वाचार्याणां मतानां अन्तरा स्वकीयदर्शनानां प्रतिपादनमप्यस्ति इति सूच्यते। एवं मदीयस्यास्य ग्रन्थस्य अनुशीलनेन समग्रतया न केवलं पूर्वाचार्याणां मतोपलब्धिः अपितु अर्थशास्त्रस्य साकल्येनावबोधश्च जनयितुं शक्रोति।

विनयाधिकरणस्य अष्टादशप्रकरणानि ततः क्रमशः निर्दिश्यन्ते। एतेषां प्रकरणानां उत्तरोत्तरं परस्पराश्रयत्वं अस्तीति दष्टुं शक्यते। प्रथमं प्रकरणं विद्यासमुद्देशः। आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरिति चतसृणां विद्यानां समुद्देशः भवति विद्यासमुद्देशः। विनयविहीनः राजा लोकशास्त्रव्यवहारेषु अशिक्षितः राज्यरक्षणे असमर्थः इत्यस्मात् विद्यासमुद्देशस्य प्राथम्येन प्रकरणत्वेन उपन्यासः।

विद्यानां उपलब्धिः वृद्धसंयोगाभावे प्राप्तुं न शक्या इत्यतः द्वितीयप्रकरणरूपेण 'वृद्धसंयोगः' प्रतिपादितः। इन्द्रियजयमन्तरेण वृद्धसंयोगः अलभ्यः इत्यतः तृतीयस्य 'इन्द्रियजय' प्रकरणस्य आवश्यकता। विद्यासु शिक्षितः जितेन्द्रियोऽपि सहायेनैव कार्यनिर्वहणे समर्थो भवेदिति तदर्थं 'अमात्योत्पत्तिः इति चतुर्थं प्रकरणम्। अमात्याः राज्ञा विविधकर्मसु नियोक्तव्याः। बुद्धिसाचिव्यं, नित्यनैमित्तिककर्मसाचिव्यं शान्तिपौष्टिककर्मानुष्ठानं इत्येतासु कर्मसु अमात्यसाहाय्यार्थं मन्त्रिपुरोहितानां अवश्यकता इत्यतः मन्त्रिपुरोहितोत्पत्तिः। ते तु मन्त्रिपुरोहिताः सर्वथा शुद्धाः भवेयुः इत्यतः उपधाभिः शौचाशौचज्ञानममात्यानां इति प्रकरणम्। तत्तत्कार्येषु गूढपुरुषाणां प्रणिधानं राज्ञा कार्यमिति अर्थात् गूढपुरुषप्रणिधिः। राज्यगतान् कृत्याकृत्यान् विज्ञाय तेषां दोषनिवारणं 'स्वविषये कृत्याकृत्यरक्षणम्' इत्यनेन तथा शत्रुराष्ट्रगतानां तेषां ज्ञानेन दोषप्रतिविधानं परविषये कृत्याकृत्यपक्षोपग्रहः इत्यनेन प्रकरणेन च विशदीक्रियते।

स्वराज्यस्य रक्षणं परराष्ट्रस्य हरणं राजकर्तव्यम्। तदर्थं मन्त्रमवश्यमावश्यकम्। अत: मन्त्राधिकार इति प्रकरणम्। परराष्ट्रेषु करणीयानां कर्मणां दूतापेक्षया दूतप्रणिधि: इति प्रकरणम्। राजपुत्राणां परोपजापेभ्यो राजान: रक्षणीया:। अत: राजपुत्ररक्षणमिति प्रकरणम्। क्वचित् अवरुद्धस्य पुत्रस्य पितरं प्रति व्यवहार: कथं, पिता च तस्मिन् कथमिति विशदीकर्तव्यं। अत: अवरुद्धवृत्तं, अबरुद्धे च वृत्ति: इति प्रकरणे। शज्ञ: दैनंदिनीं व्यापारपरिपाटीं विशदयति राजप्रणिधि: इति प्रकरणम्। राजभवनस्य कार्यपरिपाटीं विवृणेति निशान्तप्रणिधौ। राज्ञ: आत्मरक्षार्थं करणीयानि कार्याणि विशदीक्रियन्ते आत्मरक्षितकं इति प्रकरणे। एवं विनयाधिकारिके प्रथमाधिकरणे प्रतिपादितानि कार्याणि संक्षेपत: निर्दिष्टानि।

तदनन्तरं शिष्टानां चतुर्दशाधिकरणानां कार्यक्रमं विशदीकरोति। विस्तरभयात् तन्नात्र विशदीकृतम्। पञ्चदशाधिकरणांनां कार्यक्रमं सूचायित्वा एवं संक्षिपति। कृत्स्नस्यापि अस्य शास्त्रस्य समुद्देश: पञ्चदशाधिकरणानि (15) सपञ्चाशदद्यायशतं (150) साशीति प्रकरणशतं (180) षट्श्लोकसहस्राणि (1006) इति।

सुखग्रहणविज्ञेयमिति -

1. पदच्छेद:- सुखग्रहणविज्ञेयं तत्वार्थपदनिस्चितम् कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम्।

अन्यय:- सुखग्रहणविज्ञेयं तत्वार्थपदनिश्चितं विमुक्तग्रन्थविस्तरं शास्त्रं कौटिल्येन कृतम्।

अर्थ:- सुकुमारमतीनां अपि सुकरतया ज्ञातुं शक्यं, तत्वत: अर्थत: पदत: च निस्चितं, ग्रन्थबाहुल्यं परिहाय विरचितं भवति अयं अर्थशास्त्रनामक: शास्त्रग्रन्थ:। इति।

## प्रथमं प्रकरणम्। विद्यासमुद्देश:
## प्रथमोऽध्याय: आन्वीक्षिकीस्थापना।

**विद्या:** कति, काश्च ता: इति प्रथमं विशदयति आन्वीक्षिकीत्यादिना। अर्थतत्वानां हेतुभि: परीक्षणं भवति अन्वीक्षा। अन्वीक्षा यस्या प्रयोजनं भवति सा आन्वीक्षिकी। ऋग्यजु:सामानि भवति त्रयी। त्रयाणां वेदानां समाहार: भवति त्रयी। चतुर्थवेदस्य अथर्ववेदस्य आभिचारकर्मत्वात् भिन्नप्रस्थानत्वं अत एव त्रय्यां न अन्तर्भूत:। कृषि: पाशुपाल्यं वणिज्या च वार्ता। दण्डनीतिरेव राजनीति:।

विद्या: कति इत्यत्र आचार्याणां मध्ये मतभेदा: सान्ति।

प्रथमं तावत् मनुशिष्याणां पक्षं उद्भावयति- "त्रयी वार्ता दण्डनीतिश्चेति मानवा:।" इति। मानवानां

मते अन्वीक्षिकी त्रय्यामेव अन्तर्भवति। त्रय्यनुगामित्वात् आन्वीक्षिकी न विद्यान्तरम्। अत: त्रयी वार्ता दण्डनीतिरिति तिस्र एव विद्या: इति मनुशिष्यमतम्।

तदनन्तरं बृहस्पतिशिष्याणां मतमाह - 'वार्तादण्डिनीतिश्चेति' बार्हस्पत्या:। नेषां मते द्वे एव विद्ये। त्रय्या: विद्यात्वं नाङ्गीकुर्वन्ति बार्हस्पत्या: कुत इतिचेत् तेषां लोकयात्राविद: नास्तिका इत्यपवादात् रक्षणार्थमेव त्रय्या: विद्यासु अन्तर्भव:। एवं त्रयीनिरासेन तदन्तर्भवितान्वीक्षिक्या अपि निरास: साधित:।

'देण्डनीतिरेका विद्या' इति उशनसशिष्याणां मतम्। सर्वसामपि विद्यानां योगक्षेमा: दण्डनीतावेव प्रतिष्ठिता:। अत: दण्डनीति: एका एव विद्या इति शुक्रशिष्याणां अभिमतम्। एवं पूर्वाचार्याणां मतान्युपन्यस्य स्वमतं उपपादयति कौटिल्य: - 'चतस्र एव विद्या' इति। विद्याया: आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरिति चातुर्विध्यं उपस्थापयति कौटिल्य:। धर्मार्थबोधकत्वमेव विद्यानां विद्यात्वम्। अन्वीक्षिकीक्यादिभि: विद्याभि: यत् विशिष्टं भवति तत् विद्यात्वम्।

तत: आन्वीक्षिक्या: स्वरूपं विशदीकरोति:- "साङ्ख्यं योगो लोकायतं चेत्यान्वीक्षिकी" इत्यदिना। कपिलमुनिनोक्तं साङ्ख्यं, प्रत्याहारध्यानधारणादिप्रतिपादकं पतञ्जलिप्रोक्त : योग: लोकायतं च भवति आन्वीक्षिकी। त्रय्या: पठनपाठनफलं भवति धर्माधर्मयो: ज्ञानम्। अर्थानर्थानां बोध: वार्तया सञ्जायते। नयापनयौ इत्यनेन सन्धिविग्रहौ निष्पद्येते। एतयो: प्रतिपादनं दण्डनित्यां भवति। एतासु धर्मधर्माणां बलाबले युक्तिभि: विशकलनात् आन्वीक्षिक्या: लोकप्रयोजनत्वं सिद्ध्यति। आन्विक्षिक्या: प्रयोजनान्तरं भवति सा मनुष्याणां सम्पत्तौ च विपत्तौ च मन: स्थापयति इति। अपि च विचारवचनकर्मसु पाटवं च जनयति आन्वीक्षिकी।।

"प्रदीप: सर्वविद्यानां.............. इति

2. **पदच्छेद:**- प्रदीप: सर्वविद्यानां उपाय: सर्वकर्मणाम्। आश्रय: सर्वधर्माणां शश्वत् आन्वीक्षिकी मता।

**अन्वय:**- सर्वविद्यानां प्रदीप: सर्वकर्माणां उपायः शश्वत् सर्वधर्माणां आश्रय: आन्विक्षिकी मता।

अर्थ: - आन्वीक्षिकी परीक्षणसाधनत्वात् सर्वविद्यानां प्रदीप: भवति। आरम्भादिफलाधिगमपर्यन्तानां सर्वेषामपि कर्मणां उपायभूता भवति आन्विक्षीकी। लौकिकवैदिकादीनां सर्वेषां धर्माणां सर्वदा आश्रयभूता भवतीयं आन्वीक्षिकी।

द्वितीयोऽध्यायः समाप्तः

# तृतीयोऽध्याय: - त्रयीस्थापना।

सामवेद: ऋग्वेद: यर्जुर्वेद: इति त्रयो वेदा: त्रयी इत्युच्यते। अथर्ववेद: इतिहासवेद: अर्थात् रामायणमहाभाते च वेदा इत्युच्यन्ते। षडङ्गा: भवन्ति वेदानां, ते तु शिक्षा, कल्प: व्याकरणं, निरुक्तं, छन्दोविचिति:, ज्योतिषं चेति।

तदनन्तरं त्रय्या: फलं विशिदीकरोति - एष ... इति। त्रस्यां प्रतिपादिता: धर्मा: चतुर्वर्णानां चतुराश्रमाणां च स्वधर्मान् उपदिश्य स्थापनात् प्रयोजनकरा: भवन्ति।

तत: वर्णधर्मं विवृणोति - स्वधर्म इति - ब्राह्मणस्य अध्यायनं अध्यपनं यजनं याजनं दानं प्रतिग्रह इति। क्षत्रियस्य तु अध्ययनं यजनं दानं शस्त्रेण वृत्ति: प्राणिपालनम् च। वैश्यस्य अध्ययनं यजनं दानं कृषि: पाशुपाल्यं वणिज्या च । शूद्रस्य तु ब्राह्मणदिशुश्रूषा कृषिपशुपाल्यवाणिज्या: शिल्पिकर्म, कुशीलवकर्म च। तत: आश्रमधर्मं विवृणोति - ग्रहस्थस्य इति - गृहस्थ: स्वकर्म कृत्वा उपजीवनं कुर्यात्। समानकुलै:, भिन्नार्षगोत्रै: विवाह: ऋतुस्नानदिनादूर्ध्वं द्वादशनिशा: स्त्रीगमनशीलं, देवपित्रतिथिभृत्येभ्य: दानं कृत्वा शेषभोजनं च गृहस्थस्य अभिमतम्। ब्रह्मचरिण: स्वधर्मं विवृणोति -ब्रह्मचारिण: वेदाध्ययनं अग्निशुश्रूषा अभिषेक: भिक्षावृत्ति:, गुरुकुले आप्राणोत्क्रमणकालभाविनी स्थिति:। गुरो: अभावे आचार्यपुत्रे समानशाखाध्यायिनि वा वृत्ति:।

वानप्रस्थस्य स्वधर्मं विवृणोति।- ब्रह्मचर्यं, स्थण्डिले शयनं जटाजिनधारणं, अग्निकार्यं त्रिकालस्नानं देवपूजा, पितृपूजा, अतिथिपूजा कन्दफलमूलादि: वन्य:आहार: च वानप्रस्थस्य स्वधर्म: भवति।

परिव्राजकस्य स्वधर्म: - संन्यासिन: जितेन्द्रियत्वं, नैष्कर्म्यं, निस्स्वता, प्रव्राजितान्तरेणापि संसर्गत्याग:, बहुषु गृहेषु अटनं कृत्वा भिक्षास्वीकार:, काननवास:, मनोवाक्कायनैर्मल्यं च स्वधर्मः भवति।

सर्ववर्णाश्रमसाधारणान् धर्मान् विवृणोति - अहिंसा, सत्यं, शुचित्वं, गुणपक्षराहित्यं (असूयाराहित्यं), अनिष्ठुरता, क्षमा च। स्वधर्मस्य अनुष्ठेयतां प्रतिपादयति - स्वर्गलोकसुखाय मोक्षाय च भवति स्वधर्म:। तस्य उल्लंघने कर्मसंकरात् वर्णसङ्करात् च लोक: उत्सादं प्राप्नुयात्। वर्णाश्रमधर्मा: यथोक्तं अनुष्ठीयमाना: सौष्ठवं प्रतिपत्तुः लोकोपकाराय च प्रभवन्ति। अन्यथा चेत् लोकोपकारकं न प्रभवेयु:, धर्मव्याकुलीभावात् लोकनाशे च पर्यवसेयु:।

अत: राजा वर्णाश्रमधर्मरक्षणाय किं कर्तुं अर्ह इति श्लोकद्वयेन संक्षिपति - तस्मादिति -

3, 4. **पदच्छेद:**- तस्मात् स्वधर्मं भूतानं राजा न व्यभिचारयेत्। स्वधर्मं संदधान: हि प्रेत्य च इह च नन्दति। व्यवस्थितार्यमर्याद: कृतवर्णाश्रमस्थिति: त्रय्या हि रक्षित: लोक प्रसीदति न सीदति।

**अन्वय:**- तस्मात् राजा भूतानां स्वधर्मं न व्यभिचारयेत्। हि स्वधर्मं संदधान: प्रेत्य च इह च नन्दति। व्यवस्थितार्यमर्याद: कृतवर्णाश्रमस्थिति: त्रय्या रक्षित: लोक: प्रसीदति, न सीदति।

**अर्थ:** - धर्मानुष्ठानाभावे लोकनाश: भवेदित्यत: राजा न कथञ्चिदपि मनुष्याणां स्वधर्मात् व्यतिचलनं अनुमन्येत। स्वधर्मं सभ्यक् अनुष्ठापयन् परलोके अमुत्र च परमानन्दं प्राप्नोति। वर्णाश्रमाश्रित: सदाचारनियम: त्रय्या रक्षित: च लोक: सर्वथा मोदते, न कदापि विनश्यति।

**तृतीयोऽध्याय सामाप्त:**

# चतुर्थोऽध्ययः -

## वार्तादण्डनीतिस्थापना

वार्तायाः स्वरूपदिकं विवृणोति - पराशरप्रोक्तं क्षेत्रबीजवापपरिकर्मादिकं शास्त्रं (कृषिः), गवाश्वादिपरिपालनप्रतिपादकं शास्त्रं (पाशुपाल्यम्), क्रयविक्रयप्रतिपादकं शास्त्रं (वाणिज्या) च वार्ता इत्युच्यते। वाणिज्या च धान्यानां, पशूनां, सुवर्णस्य ताम्रादिलोहानां कर्मकरत्वादीनां दानेन लोके प्रयोजनकरी भवति। राजा तु वार्ताजनिताभ्यं कोशदण्डाभ्यां अर्थात् धनेन शिक्षणेन च स्वपक्षं परपक्षं च स्वायत्तीकरोति।

तदनन्तरं दण्डनीतेः स्वरूपमाह - पूर्वोक्तानां आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनः भवति दण्डः। दण्डः सामादिचतुरुपायेषु प्रधानः भवति। सति दण्डभये लोकः आन्वीक्षिक्यादिषु सभ्यक् प्रवर्तेत। दण्डस्य नीतिः अनुष्ठानं भवति दण्डनीतिः । दण्डेन अलब्धं लभ्यते, लब्धं परिरक्ष्यते, परिरक्षितं वर्धते, वृद्धं पुण्यक्षेत्रादिषु समर्प्यते। एवं लोकवृत्तेः दुण्डनीत्याश्रयत्वात् राजा सदा दण्डप्रणयने उद्युक्तः भवेत्।

पुनरपि दुण्डनीतेः उत्कर्षमुपपादयति - नहीत्यादिना। लोके तावत् दण्डनीतिवत् न किमप्यस्ति अनायत्तानां आयत्तीकरणाय। तेन भूतानां वशोपनयनं सुकरं भवति इति आचार्याणां मतम्। आचार्याणां एतन्मतं प्रतिषेधति कौटिल्यः- नेति कौटिल्यः इत्यादिना। तद्विवृणोति - तीव्रदण्डः प्रजानां उद्वेगजनकः भवति। मृदुदण्डस्तु प्रजाभिः तिरस्क्रियेत। अतः अपराधस्य गौरवानुसारं प्रयुज्यमानः दण्डः सर्वैरङ्गीक्रियते। शास्त्रतो अवगम्य सुष्ठु प्रयुक्तः दण्डः प्रजाः धर्मार्थकामैः योजयेत्। अयथावत् कामक्राधात् प्रयुक्तः दण्डः संन्यासिनः परिव्राजकांश्च कोपयति। किंपुनर्गृहस्थान्। अप्रयुक्तः दण्डः, महान् मत्स्यः क्षुद्रं मत्स्यं गसते इति तत्ववत् बलवता दुर्बलस्य पीडने पर्यवस्येत। सुप्रणीतेन दण्डेन परिरक्षितः दुर्बलः सर्बथा बलयुक्तः भवति इत्यर्थः। दण्डप्रयोजनं एवं प्रतिपादयति - चतुर्वर्णाश्रमो.... इत्यादिना।

5. **पदच्छेदः** - चतुर्वर्णाश्रमः लोकः राज्ञा दण्डेन पालितः स्वधर्मकर्माभिरतः वर्तते स्वेषु वेश्मसु।

**अन्वयः** - राज्ञा दण्डेन पालितः चतुर्वर्णाश्रमः लोकः स्वधर्मकर्माभिरतः स्वेषु वेश्मसु वर्तते।

**अर्थः** - राज्ञा सभ्यक् परिपालितः वर्णाश्रमधर्मकर्मानुष्ठानयुक्तः लोकः स्वास्थ्ये वर्तते। दण्डपालनाभावे स्वगृहे अपि स्वास्थ्यं न लभेत इत्यर्थः।।

**चतुर्थेऽध्यायः समाप्तः।**

# द्वितीयं प्रकरणम्।
# पञ्चमोऽध्यायः।
# वृद्धसंयोग:।।

तस्मादित्यादि - चतुर्वर्णात्मक: लोक: राज्ञा सुप्रणीतदण्डेन पालित: एव स्वधर्मकर्मानुष्ठानाय प्रभवेत् इत्यत: आन्वीक्षिकीत्रयीवार्तालक्षणा: तिस्र विद्या:। दुण्ड: शास्त्रविज्ञानयुक्त एव जीविनां योगक्षेमं आवहेत्।

विनय: कृतक: स्वाभाविकश्चेति द्विविध: भवति। क्रियया निर्वृत: कृतक:। वासनावशात् सिद्ध: स्वाभाविक:। थथा शाणघर्षणादिसंस्करणक्रिया रवनिप्रभवं पाषाणादिद्रव्यं संस्करोति तथा विद्याभियोग: शुश्रूषादिगुणसम्पन्नं जनं संस्करोति। शाणधर्षणादिसंस्करणक्रियया अद्रव्यं संस्कर्तुं न शक्यं तथा शुश्रूषादिगुणरहितं विद्याभियोग: न संस्करोति। अष्ट भवन्ति बुद्धिगुणा:। ते तु शुश्रूषा, श्रवणं, ग्रहणं, धारणं, विज्ञानं, ऊहः, अपोहः, तत्वाभिनिवेश: इति। श्रवणार्हेषु श्रोतुं इच्छा भवति शुश्रूषा, शुश्रूषायां जातायां आसेवा भवति श्रवणं, श्रुतार्थज्ञानं ग्रहणं, गृहीतस्य अविस्मरणं भवति धारणं, धरितार्थानां विवेकज्ञानं भवति विज्ञानं, शब्दत: अनुक्तस्य अन्यथा ज्ञानं भवति ऊहः, युक्तिरहितस्य ज्ञानस्य त्याग: भवति अपोहः, याथार्थ्यज्ञानं भवति तत्वाभिनिवेश:।। विद्या अष्टबुद्धिगुणयुक्तं जनं संस्करोति न इतरम्। विद्याया: आचार्यप्रामाण्यात् अर्थात् यस्या विद्याया: य: य: उपदेष्टा तस्य प्रामाण्यात् तत्तदाचार्यानुशासनानतिक्रमेण समुदाचार: गुरुपरिचरणदिव्रतं च (नियम:)।

पठनक्रमं च विशदीकरोति - वृत्तचौलकर्मा अर्थात् त्रिवर्ष: पञ्चवर्ष: वा शिष्य: अक्षरं गणितं च अधीयीत। उपनयनानन्तरं त्रयीं आन्वीक्षिकीं च तत्वद्विद्वद्भ्य: अधीयीत। वार्तां सीताध्यक्षादिभ्य अधीयीत। दण्डनीतिं प्रवचनप्रयोगकुशलेभ्यः च अधीयीत।

षोडशवर्षयर्तन्तं ब्रह्मचर्यं परिरक्षणीयम्। तदनन्तरं गोदानं विवाहकर्म च। एवं विवाहितस्य विद्याविचक्षणै: सह परिचय: शास्त्रसंस्कारस्य वृद्धये। कुत इतिचेत् विनयस्य विद्यावृद्धपरिचयप्रभवत्वात्।

तत: राज्ञः कलाभ्यासं निर्देष्टुं एवमाह - पूर्वमहर्भागमिति - अह्न: पूर्वभागं राजा हस्त्यश्वरथायुधशिक्षायां प्रागल्भ्यं प्राप्तुं नियोजयेत्। तृतीयमहर्भागं इतिहासश्रवणाय नियोजयेत्। अत्र इतिहासपदेन पुराणं, रामायणमहाभारतादि इतिवृत्तं, दिव्यमानुषादिचरितरूपं आख्यायिका, मीमांसादिन्यायोपन्यासशास्त्रं उदाहरणम्, मनुस्मृत्यादि धर्मशास्त्रं च बार्हस्पत्यादि अर्थशास्त्रं च विवक्ष्यन्ते। दिवसस्य रात्रेश्च शिष्टभागं नवविषयपठनार्थं पठितस्य धारणार्थं च नियोजयेत्। अगृहीतानां आभीक्ष्ण्यश्रवणं इत्यनेन ईषद्गृहीतानां सुखबोधनाय पौन:पुन्येन श्रवणं अत्र विवक्षितम्।

श्रुतात् अर्थात् श्रवणात् प्रज्ञा-त्रैकालिकी बुद्धि: जायते। प्रज्ञाया: योग: शास्त्रप्रतिपादितानां प्रयोगे या श्रद्धा सा जायते, योगात् आत्मवत्ता अर्थात् मनस्विता संजायते इति विद्याया: आत्यन्तिकं फलम्।

विद्याविनीतो इति -

6. पदच्छेद: - विद्याविनीत: राजा हि प्रजानां विनये रत: अनन्यां पृथिविं भुङ्क्ते। सर्वभूतहिते रत:।

~~अन्वय:- हि~~ प्रजानां विनये रत: विद्याविनीत: राजा सर्वभूतहिते रतः अनन्यां पृथिवीं भुङ्क्ते।

~~अर्थ:~~- विद्यया विनीत: प्रजानां शिक्षणे तत्पर:, राजा सर्वेषां जीवजालानां सुखे तत्पर: सन् राजान्तररहितां भूमिं अनुभवति।

पञ्चमोध्याय: समाप्त:।

# तृतीयं प्रकरणाम्।

## षष्ठोऽध्याय:।

**इन्द्रियजय:। - अरिषड्वर्गत्याग:।।**

अस्मिन्नध्याये इन्द्रियाणां श्रोत्रादीनां स्वस्वविषये अविरोधेन प्रवृत्तिं विवृणोति। इन्द्रियजय: स्वाभाविक: कृतक इति।। द्विधा भवति। शास्त्रसंस्कारं विना प्रकृत्या एव जायमानः भवन्ति स्वाभाविक:। शास्त्रानुष्ठानाज्जायमान: भवति कृतक:। वृद्धसंयोगानन्तरं तद्धेतुभूतस्य इन्द्रियजयस्य प्रतिपादनं प्रसक्तं एव भवति।

विद्येति - विद्यासंस्कारकारणं भवति इन्द्रियजय:। स तु कामक्रोधलोभमानहर्षाणां वर्जनात् सिद्ध्यति। परस्त्रीविषया इच्छा भवति काम:, हिंसात्मकमनोभाव: भवति क्रोध:, परोषां सम्पत्तौ अभिलाष: भवति लोभ:, आत्मानि निरूपमत्वबोधो भवति मान:, सम्पदादिसम्भवो गर्व: भवति मद:, अभिमतलाभजन्या प्रीतिर्भवति हर्ष:, एते षट् अरिषङ्वर्ग इन्युच्यन्ते। कर्णादीनां पञ्चेन्द्रियाणां तत्तदिन्द्रियाश्रितविषयेषु तात्पर्यनिरासो भवति इन्द्रियजय:। शास्त्रतो अवगतेषु शब्दस्पर्शादिषु अर्थेषु प्रवृत्तिनियम: भवति इन्द्रियजय:। अनुष्ठेयरूपेण शास्त्रप्रतिपादित: सर्वः अर्थः इन्द्रियजयस्य कारणं भवति।

तद्विरूद्धेति - शास्त्राविरुद्धमाचरन् चतु:समुद्रपर्यन्तभूमे: अधिपतिरपि राजा सद्य एव विनाशं प्राप्नुयात्। तत्रोदाहरणानि निर्दिशन्ति - यथेत्यादिना। भोजवंशज: दाण्डक्यो नाम राजा कामाद् ब्राह्मणकन्यां अपहृत्य तप्तित्रा शप्त: सबन्धुराष्ट्रो नष्ट:। तथा च विदेहराजा कराल: ब्राह्मणकन्यां कामयन् ब्राह्मणेन शप्त: विनाशं प्राप्तवान्। जनमेजयो नाम राजा कोपात् अश्वमेधे ब्राह्मणै: सह कलहायमान: शापं प्राप्तवान्। तथा च तालजङ्घ: नाम राजा भृगुभि: सह कलहं कृत्वा तच्छापात् विनष्ट:। लोभात् ऎलो नाम राजा चतुर्वर्णान्तर्गतान् जनान् अतिमात्रं धनहरणेन पीडयन् तेषां कोपान्नष्ट:। एतेनैव कारणेन सुवीरदेशाधिपति: अजबिन्दु: नाशं प्राप्तवान्। मानात् रावण: रामपत्नीं सीतामहपहृत्य तां रामाय अप्रयच्छन् वधं प्रपेदे। तद्वत् दुर्योधन: पाण्डवेभ्य: राज्यांशं अप्रयच्छन् मरणं प्राप्तवान्। तथा डम्भोद्भवो नाम राजा सर्वजननामापि अपमाननेन दभ्भात् नरनारायणाभ्यां हत:। हेहयाधिप: कार्तवीर्याजुनश्च एवमेव मदात् जमदग्निमहर्षौ कृतापराध: परशुरामात् मृतिं प्राप्तवान्। एवं च हर्षात् वातापिर्नाम असुर: अगस्त्यमुनिं वञ्चयन् मरणं प्राप्तवान्। यादवसङ्ध: व्यासं अतिसन्धाय तच्छापात् मरणं प्राप्तवान्।

अन्ये च बहव: एवं नाशं प्राप्तवन्त इति विवृणोति एते चान्ये इति श्लोकद्वयेन।

7, 8. पदच्छेद: एते च अन्ये च बहव: शत्रुषड्वर्गं आश्रिता: सबन्धुराष्ट्रा राजान: विनेशु: अजितेन्द्रिया:। शत्रुषड्वर्गं उत्सृज्य जामादगन्य: जितेन्द्रिय: अम्बरीष: च नाभाग: बुभुजाते चिरं महीम्।

अन्वय:- एते च अन्ये च बहव: राजान: शत्रुषड्वर्गमाश्रिता: अजितेन्द्रिया: सबन्धुराष्ट्रा: विनेशु:। शत्रुषड्वर्गं उत्सृज्य जितेन्द्रिया: जामदगन्य: नाभाग: अम्बरीष: च महीं चिरं बुभुजाते।

अर्थ: - पूर्वोदाहृतेभ्यः राजभ्यो अन्ये अनेके राजान: कामक्रोधादि शत्रुषड्वर्गं उपाश्रिता: अनियतेन्द्रिया: बन्धुभि: राष्ट्रेण च साकं विनाशं प्रापु:। किन्तु अन्ये केचिद्राजान: कामक्रोधादीन् शत्रुवर्गान् परित्यज्य चिरकालं राजानो भूत्वा भूमिं पालितवन्त: भवन्ति। नियतेन्द्रियवृत्ति : जाभदगन्य: तथा नभागस्तुनु: अम्बरीष: च एवं इन्द्रियजययेन अरिषड्वर्गं परित्यज्य चिरकालं भुवं पालितवन्त:।।

षष्ठोऽध्याय: समाप्त:।

# तृतीयं प्रकरणम् - इन्द्रियजयः।

## सप्तमोऽध्यायः राजर्षिवृत्तम्।।

आस्मिन्नध्याये राजर्षिवृत्तं उच्यते। तस्मादिति - यत: अरिषड्वर्गत्याग: राज्ञ: श्रेय: समार्जयति तत: अरिषड्वर्गत्यागेन इन्द्रियजयं साधयेत्, वृद्धसंयोगेन प्रज्ञां उत्तेजयेत्। गूढपुरुषेण स्वपरराष्ट्रवृत्तप्रत्यक्षीकरणं कुर्यात्। निरन्तरोद्योगेन योगक्षेमं संपादयेत्। कार्येषु आज्ञापनेन प्रजानां स्वधर्मे स्थापनं राजा कुर्यात्। चतुर्विधविद्यानां उपदेशेन प्रजा: संस्कारसमपन्नाः कुर्यात्। धनसम्पादनेन तत: समुचितपात्रसमर्पणेन च जनप्रियत्वं आर्जयेत्। हितेन लोकयात्रां च कुर्वीत।

एवं इन्द्रियजयं आर्जित: राजा परस्त्रीगमनं, परद्रव्याभिलाषं परहिंसां च परित्यजेत्। अतिनिद्रां चञ्चलमनस्कतां असत्यभाषणं अविनीतवेषं, अधर्मकारकं अनर्थकारकं च अर्थविनिमयं च राजा परित्यजेत्।

धर्मादिषु प्राधान्यनिर्णय: कथमिति विवृणोति - धर्मेत्यादिना। राजा धर्मार्थयो: अविरुद्धरूपेण कामं अनुभवेत्। राजा न कथञ्चिदपि सुखरहित: भवेत्। परस्पराश्रितान् धर्मार्थकामान् तुल्यतया सेवेत। अन्यथा को दोष इत्याशङ्क्य आह - धर्मार्थकामानां इति। धर्मार्थकामानं मध्ये अतिमात्रं सेवित: अन्यतम: इतरै पीडयत्येव। धर्मार्थकामानां समं प्राधान्यं अनङ्गीकुर्वन्नाह - अर्थ एवेति। धर्मकामानां अर्थाश्रितत्वात् एतेषां मध्ये अर्थस्यैव प्राधान्यमिति कौटिल्यस्य मतम्।

आचार्यामत्यादिसचिवसम्पत्ते: आवश्यकतां आह। मर्यादां इति। राजा आचार्यान् अमात्यांश्च परमां सीमां परिकल्पयेत्। ते एनं अनर्थानुष्ठानेभ्य निवर्तयेयु:। रहसि अन्त:पुरादौ अतिप्रसजन्तं राजानं त्रिपौरुष्यादिरूपं छायाप्रमाणं, घटिकाप्रमाणं च प्रतोद्य परिव्यथयेयु:।

सचिवस्थापनस्य आवश्यकतां दृढयति सहायेत्यादिना।

9. **पदच्छेद:**- सहायसाध्यं राजत्वं चक्रं एकं न वर्तते। कुर्वीत सचिवान् तस्मात् तेषां च शृणुयात् मतम्।।

**अन्वय:** - सहायसाध्यं राजत्वं एकं चक्रं न वर्तते। तस्मात् साचिवान् कुर्वीत। तेषां मतं शृणुयात् च।

**अर्थ:**- सहायनिर्वाह्यं राजत्वं एकाकिना निवाढुं न शक्यम्। शकटे चक्रान्तरसहायरहितं चक्रं न परिभ्रमति।

**अत:** राजा आचार्यान् अमात्यांश्च कुर्वित। तेषां मतं श्रुत्वा तदनुसृत्य कार्याणि निर्वहेत् च।।

**सप्तमोऽध्याय: समाप्त:।**

# चतुर्थं प्रकरणम्।

## अष्टमोऽध्यायः।

## अमात्योत्पत्तिः।

प्रथमं तवत् अमात्ययोग्यताविषये मतभेदा: स्वमतं च निर्दिशति। विद्यावृद्धसंयोगेन्द्रियजयसहितोऽपि राजा सहायमन्तरेण राज्यपालनं कर्तुं अशक्तः। एवं सहाये आवश्यके तत्कथमिति उपपादयति सहाध्यायिन इति।

राज्ञा अमात्यपदव्यां के नियोज्या इति चिन्तायां भारद्वाजादय: आचार्या: सप्तधा तेषां मतं विवृण्वन्ति। तत: स्वमतं च उपस्थापयति कौटिल्यः।

सहपाठिन: अमात्यान् नियुञ्ज्यात् कुत इतिचेत् तेषां शौचं नैपुण्यं च राज्ञां परिचितमेव इति वदन्ति भरद्वाजशिष्या:। ते तु राज्ञां सर्वथा विश्वास्या: भवेयु:।

एतं पक्षं प्रतिषेधति विशालाक्ष:- नेतीति। सहपाठिन: राज्ञाः सहक्रीडितत्वात् ते राजानं अनादरेयु: इति हेतोः। ये राज्ञा सह परदारगमनादि शीलच्युतिं आचरितवन्त: त एव अमात्या: भवितुं अर्हा: इति विशालाक्षस्य मतम्। तेषां अमात्यनियोगे को गुण इति विशदयति - ते हीति। राजा तेषां मर्मज्ञः भवतीति हेतो: ते अपराधं न कुर्वन्ति।

पराशरस्तु इदमधिकृत्य एवं उपपादयति। एष: दोष: राज्ञः सहपाठिनां च परस्पराश्रित: भवति। अमान्या: मन्मर्मज्ञाः इति भयात् राजा तेषां अमात्यानामपि असत्कार्याणि अनुसरेत्।

**एतदर्थे श्लोकमुदाहरति-**

10. **पदच्छेद**:- यावद्भ्य: गुह्यं आचष्टे जनेभ्य: पुरुषाधिप:। अवश: कर्मणा तेन वश्यो भवति तावताम्।

**अन्वय**:- पुरुषाधिप: यावद्भ्य: जनेभ्य: गुह्यं आचष्टे तेन कर्मणा अवश: तावतां वश्य: भवति।

**अर्थ**: - राजा यावद्भ्य: जनेभ्य: आत्मन: शीलच्युतिं प्रकाशयति अधीर: स: तेनैव कर्मणा सर्वेषामपि तेषां विधेय: भवेत्। अत: गुह्यसधर्माणो अमान्यान् न कुर्यादिति। एवं चेत् कान् अमात्यान् कुर्वीत इति विषये स्वमतं उपपादयति पराशर:। य एनमिति -

अत: राज्ञ: प्राणापायसन्दर्भेषु ये उपकारं कुर्यु: तान् अमात्यान् कुर्वित। तेषां राजनि स्नेह: अनुभवेनैव विदित: इत्यत:।

पराशरमतं खण्डयति पिशुनः - भक्तिरेषा इति। स्वशरीररक्षां अपि तृणवत् कृत्वा यः राजानं रक्षेत् तत्तु सेवैव भवति न तु बुद्धिगुणः। बुद्धिमानेव राज्ञां अमात्यो भवितुमर्हः न तु भक्तिमान् इत्याशयः। परिगणित- द्रव्योत्पत्तिषु नियुक्ताः ये यथादिष्टं तदुपरि अर्थं समार्जयेयुः तान् अमात्यान् कुरु, इति स्वमतं प्रतिपादयति पिशुनः। पिशुनमतं निराकुर्वन् कौणपदन्तः स्वमतमवतरति - अन्यैरिति। पूर्वं पिशुनेन निर्दिष्टाः यद्यपि धनभावनादिगुणैः युक्ताः भवन्ति तथापि विश्वस्ततानुरक्तुता इत्यदिभिः गुणैः वियुक्ताः भवन्ति। अतः अनुभूतपूर्ववृत्ताः पितृपितामहक्रमागताः अमात्याः भवेयुः इति कौणपदन्तमतम्। ते तु भक्त्यनुरागगुणयुक्ताः अपकारिणमपि यजमानं चिरपरिचितत्वात् न परित्यजन्ति। अयं भावः न केवलं मनुष्येषु अपि तु मृगेष्वपि दृश्यते। गावः अपरिचितं गोगणमुत्सृज्य परिचितं गणमेवाश्रयन्ते।

वातव्याधिस्तु एतन्मतं निराकरोति - नेति इत्यनेन । एवं पितृपैतामहत्वेन कुलक्रमागताः अमात्याः स्वामिनः समस्तं विभवं अवष्टभ्य स्वतन्त्रवृत्तयः भवेयुः। तस्य मते नीतिज्ञाः पूर्वसम्बन्धरहिताः अमान्याः भवेयुः, कुत इति चेत् ते तु राजानं यमस्थाने परिकल्पयन्तः राजानं न द्रुह्येयुः।

बाहुदन्तीपुत्रः वातव्याधिनः मतं निराकृत्य स्वमतं उपपादयति - शास्त्रविदिति। नीतिशाश्त्रे परिणतप्रज्ञोऽपि। अदृष्टावसराः अमात्याः पूर्वपरिचयाभावात् विषण्णाः भवेयुः। अतः कुलीनान्, बुद्ध्यतिशययुक्तः उपधाशुद्धः उत्साही अनुरागयुक्तश्च अमात्यो भवितुं अर्हः। गुणानां एव प्रधानत्वात्।

अन्ततः कौटिल्यः स्वमतमुपस्थापयति। - सर्वमिति। पूर्वं प्रकटिताः सर्वेऽपि गुणायुक्ताः भवन्ति। तथा च शौचसामर्थ्यादयो गुणाः स्वामिपरिभवादिदोषाश्च सहाध्यायिप्रभृतिषु न्याय्याः। पुरुषस्य तत्तदधिकारपदयोग्यता सहाध्ययनक्रीडादीनां शक्त्या प्रज्ञाशास्त्रसंस्कारशैर्यादितारतम्ययोगित्वलक्षणात् कल्पते। अत्र शलोकेन इममाशयं स्पष्टीकरोति - विभज्येति।

11. पदच्छेदः- विभज्य अमात्यविभवं देशकालौ च कर्म च। अमात्याः सर्वे एव एते कार्याः स्युः न तु मन्त्रिणः।

अन्वयः- अमात्यविभवं देशकालौ कर्म च विभज्य सर्वे एव एते अमात्या कार्याः। न तु मन्त्रिणः स्युः।

अर्थः- विश्वस्ततेत्यादि अमात्यगुणसम्पदं विभज्ज यस्मिन् देशे यस्मिन् काले यस्य कर्मणः सम्यक् विधानाय यः मुणः अपेक्ष्यते इति विचिन्त्य पूर्वोक्ताः सर्वे एव अमात्याः कार्याः। मन्त्रिपदे तु न निवेश्याः इति।

अष्टमोऽध्यायः समाप्तः।

# पञ्चमं प्रकरणम्। नवमोऽध्यायः।

## मन्त्रिपुरोहितोत्पत्तिः।

मन्त्री प्रधानामात्यः यस्मिन्नधीनाः सर्वे कर्मसचिवाः, पुरोहितः- पुरोऽग्रे धीयते सर्वकार्येषु प्रमाणत्वेन निवेश्यते इति पुरोहितः। तयोरुत्पत्तिः अत्र अभिधीयते।

गुणसम्पदानुगुण्येन अमात्यभेदाः। अतः अमात्यभेदान् विवृणोति - जानपदः इति। -

जानपदः अभिजातः स्ववग्रहः कृतशिल्प;, चक्षुष्मान् प्राज्ञः धारयिष्णुः, दक्षः वाग्मी प्रगल्भः, प्रतिपत्तिमान् उत्साहयुक्तः प्रभावयुक्तः क्लेशसहः, शुचिः मैत्रः दृढभक्तिः शीलबलारोग्यसत्वयुक्तः स्तम्भचापल्यवर्जितः संप्रियः वैराणामकर्ता इति अमात्यसम्पत्। एभिः पूर्वोक्तैः पञ्चविंशतिगुणैः युक्तः एव उत्तमः मन्त्री। एभ्यः गुणेभ्यः चतुर्थांशगुणहीनः मध्यमः मन्त्री भवति अर्धगुणहीनः अधमः मन्त्री च भवति। एवं गुणसम्पदनुसारं मन्त्रिणां त्रैविध्यम् भवति।

मन्त्रिणां गुणपरीक्षाक्रममुपपादयति - तेषामिति। पूर्वोक्तेषु गुणेषु जानपदत्वं अवग्रहं च विश्वस्तेभ्यः परीक्ष्य जानीयात्। शिल्पादिविषयेषु सामर्थ्यं शास्त्रविषयेषु वैदग्ध्यं च तुल्यविद्याविद्भ्यः जानीयात्। कार्यानुष्ठानेषु प्रज्ञां, घारणशक्तिं सामर्थ्यं च जानीयात्। कार्यकथनप्रसङ्गेषु वाग्मितां, प्रतिभां सामर्थ्यं च पश्येत्। पुरुषाकारत्वं, प्रभुशक्तिमत्वं क्लेशसहत्वं च आपदां प्रसङ्गेषु अभिव्यज्यते। समाचरणात् शौचं, सौहृदं यजमाने भक्तिं च ज्ञातुं शक्यते। सहवासिभ्यः शीलं, बलं, निर्व्याधित्वं धैर्यं, विगर्वत्वं, स्थिरप्रकृतित्वं च अवगभ्यन्ते। तथा च स्वानुभवात् संप्रियत्वं अवैरित्वं च ज्ञायते।

राजव्यवहारेषु आवश्यकानि साधनानि कानि इति विवृणोति प्रत्यक्षेत्यादिना। - दण्डनीतिप्रतिपाद्यः राजव्यवहारः स्वानुभवात्, परोपदिष्टत्वात् च अनुमेयः भवति। स्वयंदृष्टमेव कार्यं प्रत्यक्षं भवति, आप्तवाक्यागतं भवति परोक्षम्। कृतकार्येभ्यः अकृतकर्मणां उत्प्रेक्षणं अनुमेयम् भवति।

किमर्थमेवं महता यत्नेन अमात्यानां नियोगः इति विवृणोति - यौगपद्यादिति। राज्ञां एकस्मिन्नेव काले अनेकत्र बहुकार्याणी करणीयानि सन्ति। तानि सर्वाणि कार्याणि राज्ञा स्वयमेव कर्तुं न शक्यानि। एवं सति तेषां कर्मणां यथादेशकालं अनुष्ठानायैव तत्र राज्ञा अमात्याः नियोक्तव्याः।

पुरोहितोत्पत्तिं तन्स्थापनावश्यकतां च आह - पुरोहितमिति। शास्त्रोक्तकुलाचारयुक्तं वेदवेदाङ्गादिषु, ज्योतिश्शास्त्रे शकुनशास्त्रे, दण्डनीत्यां च निष्णातं दैवकृतानां मनुष्यकृतानां च विपदां अथर्वमन्त्रप्रयोगैः सामदानादिभिः चतुरुपायैः परिहर्तुं योग्यं च पुरोहितं कुर्वीत। एनं पुरोहितं, शिष्यः आचार्यं इव, पुत्रः पितरं इव, भृत्यः भर्तारं इव अनुसरेत्।

उक्तार्थस्य निगमनं श्लोके स्फुटयति - ब्राह्मणेनेति।

12. पदच्छेदः- ब्राह्मणेन एधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम्। जयाति अजितं अत्यन्तं शास्त्रानुगं अशस्त्रिम्।

अन्वयः मन्त्रिमन्त्राभिमन्त्रितं शास्त्रानुगं अशस्त्रितं ब्राह्मणेन एधितं क्षत्रं अत्यन्तं अजितं जयति।

अर्थः- पुरोहितेन संवर्धितं, पूर्वोक्तैः मन्त्रिभिः मन्त्रणैः संस्कृतं, शास्त्रोक्तानुष्ठानपरं अशस्त्रितं अर्थात् युध्दं विनैव एकान्ततः अजितं जयति।

नवमोऽध्यायः समाप्तः।

# षष्ठं प्रकरणम्। दशमोऽध्यायः।

## उपधाभिः शौचाशौचज्ञानममात्यानाम्।

मन्त्रिपरीक्षाविधिं उपपादयति - मन्त्रीत्यादिना। राजा मन्त्रिभिः पुरोहितेन च सह प्रथमं तावत् अमात्यान् अप्रधानेषु स्थानेषु नियुज्य उपधाभिः अर्थात् छलैः तेषां स्वामिनि दुष्टभावतां अदुष्टभावतां च परिशोधयेत्।

प्रथमं धर्मव्याजेन परीक्षाक्रममाह - पुरोहितेत्यादिना। राजा याजयितुमनर्हस्य याजने अध्यापने च नियुक्तं, अधर्मनियोजनेन कुप्यन्तं पुरोहितं स्वपदात् अवरोपयेत्। एवं राज्ञा स्वपदात् अवरोपितः पुरोहितः, सत्रिभिः एकैकं अमात्यं शपथपूर्वं भेदयेत्।

उपजापनप्रकारं तु एवमाह - अधार्मिक इत्यादिना। अधर्मवृत्तः अयं राजा। धर्मप्रवृत्तं अन्यं तस्य वंशे एव जातं अवरुध्य रक्ष्यमाणं तत्पुत्रादिकं कुलीनं, सर्वपूजितं सामन्तं, अटवीपतिं औपपादिकं (नवोदिततं) वा तस्य राज्ञः स्थाने निवेशयामः। सर्वेषां एतन्मतं अभिमतम्। कथं व भवतः इति पृच्छेत्। प्रत्याख्याने शुचिः अर्थात् यदि एवं उपजापितः

अमात्यः नाहं इदृशं कुर्यामिति निरस्येत् तर्हि सः शुध्दः भवति। एवं धर्मप्रधानेषु शोधनप्रकारः।

ततः अर्थोपधां आह - सेनापतिरित्यादिना।

अपूज्यपूजायां राज्ञा प्रेरितः सेनापतिः, तन्निराकरणात् राज्ञा परिभूतः सत्रिद्वारा राज्ञः विनाशाय एकैकमपि अमात्यं बह्वर्थदानेन प्रलोभयति। 'अयं राजा दुष्प्रवृत्तः। सत्प्रवृत्तं अन्यं तद्वंशभूतं अवरुद्धं वा तस्य स्थाने विवेशयामः। सर्वेषां एतदुपपन्नम्। भवतः मतं कथं वा? इति। यदि अमात्याः 'वयमीदृशं न कुर्याम इति प्रतिषेधन्ति तर्हि ते अमात्याः शुद्धा भवन्ति। एवं अर्थेन छलनमिति अर्थोपधा।

अथ कामोपधामाह - परिव्राजिकेत्यादिना। अन्तःपुरे विश्वस्ता सर्वासामभिप्रेता सर्वैरपि संपूज्यमाना परिव्राजिका एकैकमपि प्रधानामात्यं उपगम्य एवं भेदयेत्। भवता सह समागमामिच्छन्ती राजमहिषी भवन्तं कामयते। तद्वारा भवतः प्रभूतं धनं च लभेत। अमात्यानां प्रतिषेधे एकैकोऽपि सः शुचिः भवतीति ज्ञातुं शक्यम्। इदं भवति कामोपधा।

प्रवहणेत्यादिना भयोपधां विशदयति। अमात्येषु अन्यतमः विनोदयात्रायै सर्वान् अमात्यान् आनीय मेलयेत्। राजा तु तन्निमित्तेन आशङ्कया तान् अमात्यान् अर्थमानेभ्यः अपकुर्यात्। तदा राज्ञा नियुक्तः छात्रव्याजेन विचरन् गुढपुरुषः तेषां अमात्यानां मध्ये अर्थमानाभ्यां अपकृतान् एकैकं भेदयेत्। अयं राजा असत्कार्येषु व्यापृतः भवति। एनं हत्वा अन्यं कमपि राजानं स्थापयेत्। सर्वेषामपि अभिमतमिदं कार्यम्। भवतः कोऽभिप्रायः? यदि अमात्याः एनं तिरस्कुर्वन्ति तर्हि सर्वे ते शुचयः भवन्ति। इदं भयोपधा भवति।

उपर्युक्तासु उपधासु धर्मोपधाशुध्दान् अमात्यान् राजा धर्मस्थानुबन्धिषु कर्मसु कष्टकशोधनेषु च नियुञ्जीत। अर्थोपधाद्वारा शुध्दान् अमात्यान् धनोत्थापनादिलक्षणेषु धनरक्षणलक्षणेषु च स्थानेषु नियुञ्जीत। कामोपधाशुध्दान् विहारस्साधनभूतानां नृपस्त्रीणां रक्षणे नियोजयेत्। भयोपधाशुध्दान् राज्ञः शरीररक्षणादिकर्मसु च नियोजयेत्। चतसृषु अपि उपधासु शुध्दान् अमात्यान् मन्त्रिणः कुर्यात्। सर्वासु उपधासु अशुद्धान् खनिद्रव्यहस्तिवनकर्मान्तादिषु शरीरायासकर्मसु नियोजयेत्।

एतासु परीक्षासु राजा एव लक्ष्यते इति आचार्यमतं स्थाप्यते - त्रिवर्गेत्यादिना श्लोकेन।

13. पदच्छेदः- त्रिवर्गभयसंशुद्धान् अमात्यान् स्वेषु कर्मसु अधिकुर्यात् यथाशौचं इति आचार्याः व्यवस्थिताः।

अन्वयः- त्रिवर्गभयसंशुद्धान् अमात्यान् यथाशौचं स्वेषु कर्मसु अधिकुर्यात् इति आचार्याः व्यवस्थिताः।

अर्थः- चतसृभिः परीक्षाभिः परिक्ष्य शुचित्वं समार्जिताः अमात्याः राज्ञा तच्छुध्यानुगुण्येन स्वस्वकर्मसु नियोक्तव्याः।

एवं आचार्यमतं प्रतिपाद्य कौटिल्यः स्वमतं चतुर्भिः श्लोकैः उपपादयति नत्वेवं इत्यादिभिः श्लोकैः।

14. पदच्छेदः- न तु एवं कुर्यात् आत्मानं देवीं वा लक्ष्यं ईश्वरः शौचहेतोः अमात्यानां एतत् कौटल्यदर्शनम्।

अन्वयः- ईश्वरः अमात्यानां शौचहेतोः आत्मानं देवीं वा लक्ष्यं तु न एव कुर्यात्। एतत् कौटल्यदर्शनम्।

अर्थः- राजा उपधाभिः अमात्यानां शैचपरिक्षावेलायां न कदापि आत्मानं वा राज्ञीं वा विषयीकुर्यात्। अस्मिन् विषये कौटिल्यस्य मतं भवति एतत्।

15. पदच्छेदः- न दूषणं अदुष्टस्य विषेण इव अम्भसः चरेत्। कदाचित् हि प्रदुष्टस्य न अधिगम्यते भेषजम्।

अन्वयः- विषेण अम्भसः इव अदुष्टस्य दूषणं न चरेत्। हि कदाचित् प्रदुष्टस्य भेषजं न अधिगम्यते।

अर्थः- प्रकृत्या दोषशून्यस्य अमात्यादेः उपधाभिः वञ्चनं जीवनहेतोः जलस्य विषेण दूषणमिव न कुर्यात्। अदुष्टोऽपि यदि उपधाभिः दृष्टान्तःकरणः जायेत तर्हि तद्दोषनिवारणं यथाकथञ्चिदपि कर्तुं अशक्यं भवेत्।

16. पदच्छेदः- कृता च कलुषा बुद्धिः उपधाभिः चातुर्विधा न अगत्वा अन्तं निवर्तेत स्थिता सत्ववतां धृतौ।

अन्ययः- उपधाभिः चतुर्विधा कलुषा कृता घृतौ स्थिता सत्ववतां बुद्धिः अन्तं अगत्वा न निवर्तत।

अर्थः- चतुर्विधाभिः धर्मार्थकामभयोपधाभिः दूषिता धीराणां बुद्धिः स्वयं आरब्धस्य कार्यस्य फलं अप्राप्य न कदापि विरमति।

17. पदच्छेदः- तस्मात् बाह्यं अधिष्ठानं कृत्वा च कार्ये चतुर्विधे शौचाशौचं अमात्यानां राजा मार्गेत सत्रिभिः।

अन्वयः- तस्मात् राजा चतुर्विधे कार्ये बाह्यं अधिष्ठानं कृत्वा अमात्यानां शौचाशौचं सत्रिभिः मार्गेत।

अर्थः- राजा चतुर्विधे उपधाप्रयोगे बहिरङ्गं दूष्यं लक्षीकृत्य सत्रिद्वारा अमात्यानां शुचित्वं अशुचित्वं वा परिक्षेत।

दशमोऽध्यायः समाप्तः।

# सप्तमम् प्रकरणम् गूढपुरुषोत्पत्तिः।

## एकादशोऽध्यायः। संस्थोत्पत्तिः।

अमात्यानां शौचशौचपरीक्षणं गूढपुरुषैः विना न शक्यं इति तदुत्पत्तेः अवश्यकतां निर्दिशति अस्मिन् अध्याये।

चतुर्विधाभिः उपधाभिः अमात्यानां शौचपरिक्षां कृत्वा राजा ततः गूढपुरुषान् उत्पादयेत्। ते तु कापाटिकः, उदास्थितः, गृहपतिव्यञ्जन;, वैदेहकव्यञ्जनः तापसव्यञ्जनः, सत्रिणः, तीक्ष्णाः, रसदाः, भिक्षुकिः इति नवविधाः भवन्ति।

प्रथमं तावत् कापाटिकं लक्षयित्वा तन्नियोजनक्रमं च विशदीकरोति। सर्वत्र मित्रायमाणः कपटेन चरति इति कापाटिकः। सः परच्छिद्रवेदी, प्रगल्भः शिष्यः भवति। अविवाहितत्वात् तस्य राजकार्यैकपरत्वम्। तं धनमानाभ्यं प्रोत्साह्य मन्त्री ब्रूयात्। त्वं राजानं मां च प्रमाणीकृत्य यस्य यदकुशलं पश्यसि तत् तदानीं एव अवेदय।

तदनन्तरं उदास्थितं लक्षयति तन्नियोजनक्रमं च विवृणोति। संन्यासं प्राप्य ततश्च्युतः बुद्धिमान् सत्ववांश्च भवति उदास्थितः। कृषिवाणिज्यपाशुपाल्यकर्मार्थं परिकल्पितायां भूमौ प्रभूतहिरण्येन शिष्यैश्च सहितः कर्म कारयेत्। कर्मफलात् प्रव्रजितेभ्यः सर्वेभ्यः अन्नवस्त्रवासस्थानानि च संविदधीत। एवं स्वदीयमानग्रासादिना वृतिकामान् उपजापेन वशीकृत्य एवं भेदयेत्। यूयं एतेनैव परिव्राजकवेषेण राजकार्यं अनुतिष्ठध्वम्। धान्यतण्डुलादिग्रहणकाले अत्र आगन्तव्यम्। एवं सर्वे संन्यासिनः स्वं स्वं वर्गं उपजप्य् स्वसहायन् कुर्युः।

गृहपतिव्यञ्जनः कार्षिकवृत्या अपचयं प्राप्तः बुद्धिमान् सत्ववांश्च कर्षकः भवति। सः कार्षिकवृत्यै दत्तायां भूमौ पूर्ववत् स्वं वर्गं उपजप्य सर्वान् कर्षकान् राजसहायान् कुर्यात्।

वणिजवृत्या खिन्नः बुद्धिमान् सत्ववांश्च वणिक् भवति वैदेहकव्यञ्जनः। पूर्ववत् सः वणिक् अपि वणिजकर्मणे प्रदिष्टायां भूमौ वणिजः उपजप्य भेदयेयुः। एवं सर्वान् वैदेहकान् राजसहायान् कुर्यात्।

मुण्डः जटाधारी वा वृत्तिकामः तापसः भवति तापसव्यञ्जनः। सः नगरसमीपे अनेकैः मुण्डैः जटिलैः च सह वसेत्। सः वृक्षमूलफलपत्रादिकं वा मुष्टिमेयं तृणं वा मासद्विमासान्तरं जनप्रत्यक्षं भक्षयेत्। अन्यैः अविदितं इष्टाहारं भक्षयेत्। वणिजः शिष्याश्च एनं तापसव्यञ्जनं इष्टार्थलाभैः अर्चयेयुः। तापसप्रसादात् समृद्धार्थाः वयमिति उकत्वा धनदानादिभिः पूजयेयुः। अस्य शिष्याः असौ तापसः योगी अत एव भाविनां सम्पदां अभिज्ञः भवतीति प्रख्यापयेयुः। तत्र भाविसम्पतिज्ञानं तं प्रष्टुमागतानां शारीरिकचेष्टाभिः, शिष्याणां अक्षिभ्रूविलासादिसूचनैश्च तेषां कुलनिष्पन्नानि कार्याणि अभिलषितानि च निर्दिशेत्। अग्निदाहं चोरभयं च आदिशेत्। राजापकारिणे दूष्यवधं राजोपकारिणे सन्तोषनिमित्तं अर्थदानं च सूचयेत्। अपि च दूरदेशवृत्तान्तज्ञानं च आदिशेत्। इदं सर्वं अद्य श्वो वा भविष्यतीति राजा वा करिष्यति इति आदिशेत्। एवमुक्तं सर्वं कार्यं गुढैः सत्रिभिः साधयेत् च। धैर्यबुद्धि-वाग्मित्वप्रभुशक्तियुक्तानां प्रष्टृणां राज्ञः भाविनं भाग्यलाभं मन्त्रिसमागमं च आदिशेत्। मन्त्री तु एतेभ्यः वृत्तिकर्माणि दत्वा तापसवचनं सफलं कुर्यात्। ये च अपकाररूपात् कारणात् राजानं प्रति क्रुद्धाः तान् अर्थदानेन स्थामानेन च शान्तान् कुर्वीत। कारणं विना शजानं प्रति कुद्धान् गूढवधेन उन्मूलयेत्। तथा राजद्वेषिणश्च विनाशयेत्।

एतद्विशदयति श्लोकेन - पूजितेति...।

18. पदच्छेदः- पूजिताः च अर्थमानाभ्यां राज्ञा राजोपजीविनां। जानीयुः शौचं इति एताः पञ्च संस्थाः प्रकीर्तिताः।

अन्वयः- राज्ञा अर्थमानाभ्यां पूजिताः राजोपजीविनां शौचं जानीयुः इति एताः पञ्च संस्थाः प्रकीर्तिताः।

अर्थः- राज्ञा अर्थदानेन स्थानदानेन च पूजिताः गूढपुरुषाः अमात्यादीनां शुद्धिं संशोधयेयुः। इत्थं कापाटिकाद्येकैकप्रधानाः पञ्च संस्थाः अर्थात् गूढपुरुषकर्मस्थानानि प्रतिपादिताः भवन्ति।

गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः इति एकादशोऽध्यायः समाप्तः।

# अष्टमं प्रकरणम्। गूढपुरुषप्रणिधिः।

## द्वादशोऽध्यायः सञ्चारोत्पत्तिः।

पूर्वाध्याये गूढपुरुषेषु कापाटिकादीनां स्वरूपं प्रतिपदितम्। सत्रितीक्ष्णरसदभिक्षुकीणां स्वरूपं अस्मिन्नध्याये आदावेव विवृणोति। संस्थाशब्दवाच्याः कापाटिकादयः स्वस्थाने सम्यक् तिष्ठन्त एव राजकार्यमनुतिष्ठन्ति। सत्रिप्रभृतयस्तु सर्वत्र सञ्चरन्त एव राजकार्यमनुतिष्ठन्ति। अतः सञ्चारोत्पत्तिः इति नाम सार्थकं एव।

सत्रितीक्ष्णरसदभिक्षुकीणां क्रमेण लक्षणानि आह - ये चाप्यसम्बन्धिन इत्यादि। राज्ञः अबान्धवाः राज्ञा निर्णयेन भर्तव्याः, सामुद्रिकादिलक्षणशास्त्रं, शिक्षाव्याकारणादिशास्त्रं अङ्गस्पर्शेन शुभाशुभज्ञानं वा, वशीकरणविद्यां अन्तर्धावनविद्यां, इन्द्रजालं, मनुस्मृत्यादिधर्मशास्त्रं पूर्णकुम्भदर्शनादि, पक्षिशकुनं एवंविधशास्त्राण्यधीयानाः कामतदनुबन्धगीतनृत्तादिशास्त्राणि च अधीयानाः भवन्ति सत्रिणः।

अथ तीक्ष्णान् लक्षयति - ये जनपदे इत्यादिना। ग्रामेषु निवसन्तः पराक्रमिणः, आत्मानमपि विगणय्य धनसम्पादनार्थं हस्तिना व्यालेन वा ये युद्धं कुर्वन्ति ते भवन्ति तीक्ष्णाः।

ये बन्धुषु इत्यादिना रसदान् लक्षयति। ये बन्धुभिः सह कलहायमानाः, निरुत्साहाः स्नेहशून्याश्च भवन्ति ते रसदा इत्युच्यन्ते। ते रसदाने विषदाने अपि निश्शङ्काः भवन्ति इत्यर्थः।

अथ भिक्षुकीं लक्षयति। या दारिद्रा विधवा प्रगल्भा भोगार्थिनी च ब्राह्मणी अन्तःपुरे स्वीक्रियमाणा अमात्यगृहाणि गत्वा सत्कारं स्वीकरोति च सा भवति भिक्षुकी। एतया ब्राह्मणपरिव्राजिकया उक्तया ब्राह्मणपरिव्राजिकासमानाचाराः मुण्डाः वृषल्यः च बुद्धभिक्षुक्यः शूद्राः च उक्ताः भवन्ति। पूर्वोक्ताः। सत्रितीक्ष्णरसदभिक्षुक्यः सञ्चाराः इत्युच्यन्ते अथवा सञ्चारपदव्यपदेष्टव्याः।

तेषां नियोजनक्रममाह

राजा स्वजनपदे तान् सञ्चारान् अपसर्पयेत्। मन्त्रिपुरोहितसेनापतिप्रभृतिषु अष्टादशपुरुषेषु तेषां शौचपरीक्षायै एतान् नियोजयेत्। मन्त्रिपुरोहितेत्यादिना मन्त्री, पुरोहितः, सेनानायकः युवराजः, प्रतीहारी, अन्तःपुराधिकृतः, स्कन्धावारनिवेशयिता, राज्यार्थं समाहरणकर्ता भण्डागाराधिकृतः, कण्टकशोधनाधिकृतः नायकः, पुरमुख्यः, प्राड्वीवाकः, आकरकर्माधिकृतः, मन्त्रिसभाध्यक्षः, सेनामुखनेता, प्राकाररक्षकः, राज्यसीमारक्षकः, अटवीदेशपालक इत्येतेषां शौचं परीक्षितुं विश्वसनीयदेशवेषशिल्पभाषायुक्तान् कुलीनान् भक्तिसामर्थ्यानुसारं चारत्वेन नियोजयेत्।

मन्त्रिप्रभृत्यष्टादशवर्गेषु बाह्यसमाचारपरिज्ञानक्रममाह तेषां बाह्यमित्यादिना। तेषां मन्त्रिप्रभृतीनां बाह्यं समाचारं आतपत्रग्राहिभिः, कनकालुकपात्रग्राहिभिः तालवृन्तग्राहिभिः पादुकग्राहिभिः आसनग्राहिभिः आन्दोलिकावाहकैः अश्वग्राहिभिः च तीक्ष्णैः ज्ञातव्यम्। एवं तीक्ष्णविदितं चारं सत्रिणः राज्ञः समीपं निवेदयेयुः।

तदनन्तरं अमात्यादिविषयकरस्य आन्तरसमाचाराज्ञानक्रमं विशदयति सूदारालिकेत्यादिना। राज्ञः गृहान्तर्गतं

चारं ज्ञातुं अधोनिर्दिष्टा एव समर्थाः भवन्ति। सूदः नाम अन्नकर्ता, आशुलिकः भक्ष्यकारः, राज्ञः तथा अन्तःपुरगतानां राजमहिषीणां स्नपयिता, अङ्गमर्दकः, शय्यास्तरणकर्ता, क्षुरकः, अलङ्कर्ता, जलहारकः कुब्जः वामनः, अल्पतनुः मन्दबुद्धिः अर्थात् लोकव्यवहारेषु अज्ञः, अन्धः एवंरूपेण वेषप्रच्छन्नः अमात्यानां अभ्यन्तरं चारं जानीयात्। अपि च नटः, नर्तकः, अङ्गविक्षेपकर्ता, गायकः, वीणादीनां वादकः पुराणदिपुस्तकवाचकः, कुशीलवः स्त्रियः च आभ्यन्तरं चारं जानीयुः। एवं वेषप्रच्छन्नैः रसदैः ज्ञातं चारं भिक्षुक्यः राजस्थानेषु समर्पयेयुः।

एवं संस्थासु समर्पितं चारं कथं राज्ञे निवेदनीयं इति विवृणोति - संस्थानामन्तेवासिनः इत्यादिना। पत्रे निवेशिताभिः संज्ञालिपिभिः बाह्यस्य आभ्यन्तरस्य च चारस्य राज्ञे समर्पणं संस्थान्तेवासिभिः कार्यम्। ते संस्थान्तेवासिनः अन्यसंस्थान्तेवासिनां चारं परस्परं कथञ्चिदपि न जानीयुः। परस्परज्ञाने तु स्वचारस्य अन्यचारेण तुल्यतां वृथैव परिकल्प्य राजानं वाञ्चयेयुः।

यदि भिक्षुकीनां अन्तःप्रवेशःन लभेत तर्हि कथं सूदादिसकाशात् चारवृत्तान्तः निष्क्रामयितव्यः इत्याह भिक्षुकीत्यनेन। भिक्षुकीनां अन्तःप्रवेशनिरोधे द्वास्थपरम्परा चारं निर्हरेत्। तदभावे अन्तःपुरपरिजनानां पितृरूपेण मातृरूपेण वा व्यवहरन्तः गूढपुरुषाः चारं निर्हरेयुः। शिल्पकारिकाः, गायकाः, परिचारिका वा चारं निर्हरेयुः। सूचनीयार्थसूचकेन गीतेन, श्लोकेन, वाद्येन जलकुम्भादौ क्षिप्तेन गुढलेख्येन संज्ञासूचकेन वा चारं निर्हरेयुः।

एवमपि चारनिर्वहणोपायाभावे सूदादयः स्वयमेव चरनिर्हरणाय अन्तःपुरात् निर्गच्छेयुः इति विवृणोति दीर्धरोगोन्मादे त्यादिना। झटित्येव दीर्धरोगेण उन्मादेन अग्निदानेन विषदानेन च सूदादयः वहिर्गच्छेयुः। चारनिवैदितानां वृत्तानताः परीक्ष्यैव विश्वसनीय इत्याह त्रयाणामित्यादिना। अन्योन्यानभिज्ञाः गूढपुरुषाः परस्परसंवादि वाक्यमेव ब्रुवते तर्हि तत्र विश्वासः अवश्यं भाव्यः। तेषां वाक्यानि पुनःपुनः विसहशानि यदि भवेयुः तर्हि तेषां तूष्णींदण्डः प्रतिषेधो वा भवेत्।

कण्डकशोधनाधिकारणे उक्ताः गूढपुरुषाः शत्रुराज्ये कृतवेतनाः वसेयुः। किमर्थमितिचेत् चारणां निरायासानुष्ठानार्थ परचाशणां अपसर्पणात् निरोद्धुमपि ते उभयवेतनग्राहिणः भवेयुः

एवं चारवृत्तान्तावेदकानां परीक्षाक्रममाह गृहितेत्यादिना।

19. पदच्छेदः- गृहीतपुत्रदारान् च कुर्यात् उभयवेतनान्। तान् च अरिप्रहितान् विद्यात् तेषां शौचं च तद्विधैः।

अन्वयः- उभयवेतनान् गृहीतपुत्रदारान् कुर्यात् च अरिप्रहितान् तान्, तेषां शौचं च ताद्विधैः विद्यात्।

अर्थः- एवं उभयवेतानान् गूढपुरुषान् राजा कृतपुत्रदाररक्षणान् कृत्वा परेषां चाराय नियोजयेत्। शत्रुसमीपं प्रेषितानां एत्तेषां उभयवेतनानां परिशूद्धिं तांश्च राजा तथाविधैः अभयवेतनैः एव जानीयात्।

चाराणां वासार्थस्थानकल्पनाचातुर्यं निगमनं च विवृणोति एवं शत्रौ इत्याद्यैः षड्भिः श्लोकैः।

20. पदच्छेदः- एवं शत्रौ च मित्रे च मध्यमे च आवपेत् चरान् उदासीने च तेषां च तीर्थेषु अष्टादशसु अपि।

अन्वयः- एवं शत्रौ मित्रे मध्यये उदासीने च तेषां अष्टादशसु तीर्थेषु अपि चरान् आवपेत्।

अर्थः- एवं तेषां शत्रुमित्रमध्यमोदासीनानां मन्त्रिपुरोहितसेनापतिप्रभृतिषु अष्टादशसु कार्यस्थानेषु च चरान् विसृजेत्।

21. पदच्छेदः- अन्तर्गृहचराः तेषां कुब्जवामनषण्डकाः शिल्पवत्यः स्त्रियः मूकाः चित्राः च म्लेच्छजातयः।

अन्वयः- तेषां अन्तर्गुहचरा; कुब्जवामनषण्डकाः शिल्पवत्य स्त्रियाः मूकाः चिन्नाः म्लेच्छजातयः च उपजपेत्।

अर्थः- राज्ञां अन्तःपुरेषु गडुलखर्वषण्डाः शिल्पकारिण्यः स्त्रियः मूकाः नानाप्रकाराः हीनजातयः च चारे नियोज्याः।

22. पदच्छेदः- दुर्गेषु वणिजः संस्थाः दुर्गान्तो सिद्धतापसाः कर्षकोदास्थिताः राष्ट्रे राष्ट्रोन्ते व्रजवासिनः।

अन्वयः- दुर्गेषु वणिजः संस्थाः (कार्याः) दुर्गन्ते सिद्धतापसाः, राष्ट्रे कर्षकोदास्थिताः, राष्ट्रान्ते व्रजवासिनः च संस्थाः (कार्याः)

अर्थः- जलादिदुर्गवत्सु महानगरेषु वणिजः गूढपुरुषत्वेन नियोज्याः। दुर्गसीमायां सिद्धतापसाः चारत्वेन नियोज्याः। तथा राष्ट्रे कर्षकाः आश्रमेभ्यः च्युतः धैर्ययुक्तः च चारे कार्याः। राष्ट्रसीमायां गोपालाः गूढपुरुषाः कार्याः।

23. पदच्छेदः- वने वनचराः कार्याः श्रमणाटविकादयः परप्रवृत्तिविज्ञानार्थाः शीघ्राः चारपरम्पराः।

अन्वयः- वने श्रमणाटविकादयः वनचराः कार्याः, परप्रवृत्तिज्ञानार्थाः शीघ्राः चारपरम्पराः (कार्याः)।

अर्थः- वने चारप्रवृत्तौ क्षपणकाटवीपालादयः वनचराः नियोक्तव्याः। शत्रूणां व्यापारज्ञानप्रयोजनाः क्षिप्रचारिणः चारणां सङ्घाः च कर्तव्याः।

24. पदच्छेदः- परस्य च एते बोद्धव्याः तादशैः एव तादशाः। चारसञ्चारिणः संस्थाः गूढाः च अगूढसंज्ञिताः परस्य चारसञ्चारिणः संस्थाः च तादृशैः एव बोद्धव्याः।

अन्वयः- एते तादृशाः गूढाः अगूढसंज्ञिताः परस्य चारसञ्चारिणः संस्थाः च तादृशैः एव बोद्धव्याः।

अर्थः- एते उक्तप्रकाराः प्रच्छन्नरूपिणः अप्रच्छन्नरूपिणः च चाराः शत्रोः चारसञ्चारिणः संस्थाः च तत्प्रकारैरेव ज्ञातव्याः।

25. पदच्छेदः- अकृत्यान कृत्यपक्षीयैः दर्शितान कार्यहेतुभिः परापसर्पज्ञानार्थं मुख्यान् अन्तेषु वासयेत्।

अन्वयः- अकृत्यान् मुख्यान् कृत्यपक्षीयैः कार्यहेतुभि; दर्शितान् परापसर्पज्ञानार्थं अन्तेषु वासयेत्।

अर्थः- असाध्यान् विरुद्धान् अपि राष्ट्रमुख्यान् साध्यपक्षोचितैः कार्यकारणैः कृत्यतया बोधितान् कृत्वा परचार पुरुषज्ञानाय राष्ट्रसीमासु वासयेत्।

द्वादशोऽध्यायः समाप्तः

## नवमं प्रकरणं त्रयोदशोऽध्यायः।

## स्वविषये कृत्याकृत्यपक्षरक्षणम्।

स्वविषये कृत्याकृत्यपक्षरक्षणं अत्र विशदीक्रियते। कृत्याः नाम क्रुद्धलुब्धभीतावमानिनः शत्रुभेद्याः तद्विपरीताः अकृत्याः। कृत्यपक्षस्य अकृत्यपक्षस्य च रक्षणं अर्थात् परोपजापात् पालनं अत्र वर्ण्यते इत्यर्थः।

मन्त्रिपुरोहितादिषु चारप्रणिधानानन्तरं पौरजानपदानां चारस्य आवश्यकतां उपपादयति कृतेत्यादिना। पूर्वोक्ताष्टादशसंस्थासु मन्त्रिपुरोहितामात्यादीनां चारं निर्वर्त्या ततः गूढपुरुषैः पौरान् पुरवासिन; जानपदान् ग्रामवासिनश्च परिशोधयेत्। ते राजानं प्रति अनुरागिणः अपरागिणः वा इति परीक्षेत।

तत्परीक्षाक्रममाह - सत्रिण इति। सत्रिणः कलहायमानाः सन्तः नदीतीर्थेषु, ब्राह्मणसभासु अन्नपानशालासु कर्मकरसमाजेषु जनसभासु च विवादं कुर्युः। "अयं राजा सर्वगुणसम्पन्न इति श्रूयते। अस्मिन् राजानि न केवलं कोऽपि गुणो द्रष्टुं शक्यते। किन्तु असौ राजा जनान् दण्डकराभ्यं पीडयति च। "इति एकः सत्री वदति। तत्र ए पूर्वोक्तस्य अनुकूलतया वदन्ती तान् पूर्वसत्रिणं च इतर; सत्री प्रतिषेधयेत्। कथामिति चेत् पुरा बलवान् अबलं द्रुह्येदिति मात्स्यन्यायेन पीडिताः प्रजाः विवस्वतः सुतं मनुं राजानं अकारयन्। धान्यस्य षष्ठमंशं विक्रेयद्रव्याणां दशममंशं यधादेशं हिरण्यस्य अंशं च राज्ञः भागधेयं कल्पयामासुः। एवं प्रजाभ्यः भागधेयग्रहणेन भृताः राजानः प्रजानां योगक्षेमं वोढुंअर्हाः। प्रजासु राज्ञा प्रयुज्यमानः दण्डः प्रजाभ्यो गृह्यमाणाः कराः च प्रजानां चौर्यादिजनितं पापं दूरीकुर्वन्ति। एवं कराणां योगक्षेमावहत्वात् ऋषयः अपि उञ्छस्य षष्ठमंशं राज्ञे कररूपेण प्रयच्छन्ति, तस्य एतत् भागधेयमिति मत्वा यः अस्मान् रक्षति। अत एव इमे राजानः इन्द्रयमतुल्याः प्रत्यक्षनिग्रहानुग्रहाः। तान् अवमन्यमानः दैविकं दण्डमप्यनुभवति। अतः न कदापि राजानः अवमन्तव्याः"। एवं वदन् सत्री क्षुद्रजनान् प्रतिषेधयेत्।

जनप्रवादादिनापि प्रजासु तुष्ट्यतुष्ट्यादिज्ञान। वश्यकतां विवृणोति किंवदन्ती इत्यादिना। सत्रिणः जनश्रुतिं च जानीयुः। ये राज्ञः धान्यपशुहिरण्यानि आश्रित्य उपजीवन्ति तैः धान्यादिभिः सुखे दुःखे च उपकुर्वन्ति, ये क्रुद्धं बन्धुं राष्ट्रं वा क्रोथान्निवर्तयन्ति, ये शत्रुं, अटवीपालं वा शत्रुभावात् निवारयन्ति तेषां तुष्टिं वा अतुष्टिं वा मुण्डजटिलवेषधारिणः गूढपुरुषाः जानियुः।

सन्तुष्टानां विशेषमर्यादा, असन्तुष्टानां सामाद्युपयेन सन्तोषोत्पादनयत्नः, यत्नवैफल्ये शिक्षां च निर्दिशति तुष्टानित्यादिना। ुष्टान् राजा अर्थमानैः पूजयेत्। असन्तुष्ठान् तेषां सन्तोषाय अर्थदानेन सान्त्वनवचनेन च प्रसादयेत्। अथवा एतान् असन्तुष्टान् परस्परं वा सामन्तेभ्यः अटवीपालेभ्यः, तस्यै कुले अवरुद्धेभ्यः च भेदयेत्। एवं सत्यपि अतुष्यतः दण्डसाधनाधिकारे, करसाधनाधिकारे च नियुज्य जानपदिकानां विद्वेषं जनयेत्। एवं जनैः विद्विष्टान् गूढवधेन जनपदविद्वेषेण वा दमयेत्। अथवा तेषां पुत्रान् दाराश्च परिरक्ष्य तान् खन्यादिषु वासयेत्, अन्यथा ते शत्रूणां विस्वस्ताः भवेयुः इति आशंङ्कया।

अनन्तरं स्वविषये कृत्याकृत्यपक्षरक्षणमाह - क्रुद्धेत्यादिना। क्रुद्धलुब्धभीतावमानिनः शत्रूणां भेद्याः भवन्ति। एतेषां अन्योन्यसभ्बन्धं शत्रुसम्बन्धं च ज्योतिषिनैमित्तिकमौहूर्तिकवेषधारिणः गूढपुरुषाः जानीयुः। राज्ञि तुष्यतः अकृत्यपक्षान् अर्थमानाभ्यां आदरेत्। अतुष्टान् कृत्यान् सामादिभिः चतुरपायैः साधयेत्।

26. पदच्छेदः - एवं स्वाविषये कृत्यान् अकृत्यान् च विचक्षणः परोपजापात् संरक्षेत् प्रधानान् क्षुद्रकान् अपि।

अन्वयः- एवं विचक्षणः स्वविषये प्रधानान् क्षुद्रकान् अपि कृत्यान् अकृत्यान् च परोपजापात् संरक्षेत्।

अर्थः- एवं नीतिज्ञः राजा स्वराज्ये मुख्यान् अमुख्यान् च कृत्याकृत्यान् शत्रूणां उपजापत् संरक्षेत्।

त्रयोदशोऽध्यायः समाप्तः।

दशमं प्रकरणम्। परिविषये कृत्यकृत्यपक्षोपग्रहः।

चतुर्दशोऽध्यायः।

परविषये शत्रुजनपदे कृत्यपक्षस्य अतुष्टवर्गस्य अकृत्यपक्षस्य तुष्टवर्गस्य च उपजापादिना स्वायत्तिकरणं अत्र उच्यते। तत्र क्रुद्धवर्गपरिगणनमाह - संश्रुत्येन्यादिना। अर्थं ददामीति प्रतिज्ञाय अदत्वा वञ्चितः, शिल्पे धनोत्पादकप्रवृत्तौ च समानं कर्म कृतवतो; मध्ये अवमानितः, राजवल्लभैः प्रतिरुद्धराजधानीप्रवेशः छूतक्रीडांर्थं आहूय अपहृतार्थः, प्रवासेन दुःखितः, कार्यार्थं राजवल्लभेभ्यः उत्कोचं दत्वापि अलब्धप्रयोजनः, प्रवासेन दुःखितः, कार्यार्थं राजवल्लभेभ्यः उत्कोचं दत्वोपि अलब्धप्रयोजनः, स्वधर्मात् दायाद्याद्वा प्रतिषिद्धः, बहुमतस्थानात् अधिलाराच्च प्रच्यावितः, राजकल्पनया बन्ध्वादिभिः अन्तर्हितः, बलात्कारघर्षितस्त्रीकः, बन्दीकृतः, परवचनप्रत्ययात् विचारणं विनैव दण्डितः, मिथ्यान्यायेन सत्कर्मनुष्ठानात् प्रतिषिद्धः, हृतसर्वस्वः, बन्धनेन अतिखिन्नः, स्वदेशन्निष्कासितबन्धुः इत्यादयः भवन्ति क्रुद्धवर्गाः।

अथ भीतवर्गं निर्दिशति स्वयमुपहत इत्यादिना। स्वयमेव दुष्कर्मणा विनष्टः, प्रारब्धस्वरूपविरुद्धक्रियः, पापकर्मणा अभिशप्तः, स्वसमानदोषे प्रयुक्तं दण्डं दृष्टवा भीतः, भूम्यपहर्ता, दण्डेन कर्शितः, स्वर्वेषु राजकीयस्थानेषु कृतकर्मः, सहस । बहुधनं सम्पादितवान्, राजकुलीनं कञ्चित् कामपूरणार्थं आश्रितः, नीचैः सह कर्मकरणात् राज्ञा द्विष्टः, राजद्वेषी च भवति भीतवर्गः।

अथ लुब्धवर्गमाह - परिक्षीण इत्यादिना। विनष्टसर्वसम्पदः, राज्ञा दण्डकररूपेण गृहीतसम्पत्तिमान्, कृपणः, दुर्गुणी, अतिमात्रधनव्यवहारी च लुब्धवर्गे अन्तर्भवति।

मानिवर्गमुपपादयति आत्मसम्भावितेति। आत्माभिमानी, सम्पदं अवगणथ्य आदराभिलाषी, शत्रोः पूजायां अमर्षयुक्तः, नीचजनैः आदृतः, आत्मत्यागी, साहसिकः, सुखभोगानुभवेन अतृप्तः च मानिवर्ग इत्युच्यते।

उपर्युक्तेषु क्रुद्धादिकृत्यपक्षीयेषु यः यद् अभिलषति तं मुण्डजटिलव्यञ्जनैः गूढपुरुषैः भेदयेत्। तभ्देदनप्रकारमाह यथा मदान्ध इत्यादिना। यथा उन्मत्तेन अधिष्ठितः मत्तगजः पुरोगतानि सर्वाण्यपि वस्तूनि विनाशयति तथा शस्त्रज्ञानहीनः राजा सर्वान् पौरान् जानपदांश्च हन्तुं उद्युक्तः। प्रतिहस्तिप्रोत्साहनेन अमर्षः क्रियतां इति उक्त्वा क्रुद्धवर्गं भेदयेत्।

अथ भीतवर्ग उपजापक्रममाह - यथा लीनेत्यादिना। भीतः सर्पः यस्थांकस्वांचित् गुहायां नीनः सन्, आत्मानां प्रति भीतिजनकं जनं प्रति विषं उत्स्त्रक्ष्याति तथा त्वयं पूर्वमेव जातशङ्कः अयं राजा त्वां उद्दिश्य क्रोधविषं प्रसारयेत्ऊ अतः त्वं इतः अन्यत्र गत्वा स्वयं रक्ष्यतां इन्युक्त्वा भीतवर्गं उपजापयेत्।

ततः लुब्धवर्गे उपजापक्रमं विशदयति - यथा श्वगाणिनां इत्यादिना। यथा श्वगणिभिः परिपाल्यमाना गौः शुनकेभ्यः एव क्षीरं दुग्धे तथा सत्वगुणहीनोऽयं राजा प्रज्ञाहीनेभ्यः सत्वशक्तिरहितेभ्यः दुर्गुणेभ्य एव धनं प्रयच्छते, न तु सद्गुणसम्पन्नेभ्यः। अतः त्वं सत्वगुणोपेतस्य तस्य राज्ञः समीपं गच्छ इत्युक्त्वा लुभ्धवर्गं उपजापयेत्।

मानिवर्गे उपजापक्रमः एवं भवति। यथा चण्डालैः उपयुज्यमानः कूपः चण्डालायैव भवति न त्वितरेभ्यः तथा अयं दुर्वृत्तः राजा नीचानां एव आश्रयणीयः भवति, न त्वितरेभ्यः, तथा न कथञ्चिदपि त्वद्विधानां श्रेष्ठानाम्। अन्यं राजानं सूचयित्वा अयं राजा पुरुषविशेषं सम्यक् जानाति। अतः तत्समीपं गच्छ इति मानिवर्गं भेदयेत्।

एवं उपजापेन विनीतानां यथार्हं स्वराष्ट्रसंयोजनादिसन्नाहं कथमिति संक्षिपति श्लोकद्वयेन।

27. पदच्छेदः- तथा इति प्रतिपन्नान तान् संहितान् पणकर्मणा योजयेत तथाशक्ति सापसर्पान् स्वकर्मसु।

अन्वयः- ~~तथा इति~~ प्रतिपन्नान् पणकर्मणा संहितान् तान् सापसर्पान् कृत्वा यथाशक्ति सकर्मसु योजयेत।

अर्थः- एवं उपजापेन परपक्षप्रवेशमङ्गीकृतवतः सत्यशपथादिना कृतसन्धानान् कृत्यान् चारसहितान् कृत्वा यथाशक्ति स्वकर्मसु नियुञ्जीत।

28. पदच्छेदः- लभेत सामदानाभ्यां कृत्यान् च परभूमिषु अकृत्यान् भेददण्डाभ्यां परदोषान् च दर्शयेत्।

अन्वयः- ~~परभूमिषु~~ कृत्यान् सामदानाभ्यां लभेत। अकृत्यान् भेददण्डाभ्यां च। परदोषान् च दर्शयेत्।

अर्थः- परजनपदे कृत्यात् सामदानाभ्यां साधयेत्। अकृत्यान् भेददण्डाभ्यां च साधयेत्। एवं भेदनसाधनेषु परदोषान् दर्शयेत् च।

चतुर्दशोऽध्यायः समाप्तः।

एकादशम् प्रकरणम् - मन्त्राधिकारः
पञ्चदशोऽध्यायः

मन्त्रो नाम कर्मणामारम्भोपायादिकार्यनिरूपणम्। सः अस्मिन् प्रकरणे अधिक्रियते इति मन्त्राधिकारः। स्वविषये परविषये च कृत्याकृत्यानां स्वानुकूलीकरणं कृत्वा स्वविषये दुर्गादीनां परविषये सन्धिविग्रहादीनां आरम्भाः राज्ञा सम्यक् आलोच्य कर्तव्याः इत्याह कृतस्वपक्षेत्यादिना। स्वपक्षान् परपक्षांश्च स्वायत्तीकरणानन्तरं राजा कार्यसाक्षात्काराय प्रयत्नं कुर्यात्। सर्वेषामपि कर्मणां आरम्भाः मन्त्रपूर्वाः भवेयुः।

मन्त्रयोग्यः देशः सर्वतः आवृतः भवेत्। अपि च तत्रतः वचनानां बहिर्निष्यन्दः कथञ्चिदपि न भवेत्। एवं एव श्वानैः इतरैः मृगैश्च मन्त्रभेदः क्रियेत इत्यतः च। अतः अनूहूतः मन्त्रदेशं न गच्छेत्। मन्त्रभेदिनं उन्मूलयेत् च।

न केवलं वचनेन अपितु तत्राहूतानां इङ्गिताकारैरपि मन्त्रभेदो भवेदित्याह - मन्त्रभेदो हीत्यादिना। मन्त्रे सन्निहितानां दूतानां, अमात्यानां, यजमानस्य वा स्वाभाविकविलक्षणचेष्टितैः अङ्गसंस्थानाच्च मन्त्रभेदः संजायते। मन्त्रस्य संवरणं मन्त्रसन्निहितानां रक्षणं च कार्यसमाप्तिपर्यन्तं राज्ञा कार्यम्। मन्त्रे सन्निहितानां अनवधानता मद्यपानादिजनितः मदः, स्वप्नालापः, विषयतृष्णा, गर्वः च मन्त्रं भिनत्ति। तस्मात् राजा सर्वदा मन्त्ररक्षणे व्यापृतः भवेत्।

मन्द्रभेदे दोषोपपादनपूर्वकं मन्त्रकर्तुः एकत्वमतोपपादनं आह - मन्त्रभेदो हि इत्यादिना। मन्त्रस्य भेदः राज्ञः तथा आयुक्तपुरुषाणां च योगक्षेमविध्वंसकः भवति। अत रहसि एक एव सन् राजा मन्त्रयेदिति भारद्वाजानां मतम्। एतेषां मन्त्रिणां अपि कोचिन्मान्त्रिणः भवेयुः। तेषां अपि अन्ये केचिन्मन्त्रिणः एवं मन्त्रिणां परम्परा मन्त्रं भिद्यात्।

29. पदच्छेदः- तस्मात् न अस्य परे विद्युः कर्म विञ्चित् चिकीर्षितम्। आरब्धारः तु जानीयुः आरब्धं कृतं एव वा।

अन्वयः- तस्मात् अस्य चिकीर्षितं कर्म परे न विद्युः किन्तु आरब्धारः आरब्धं कृतं एव वा जानीयुः।

अर्थः- मन्त्रभेदप्रसङ्गात् विजिगीषोः राज्ञः चिकीर्षितं कार्यं न कथञ्चिदपि अन्ये जानीयुः। किन्तु आरब्धारः एव आरब्धं जानीयुः। अथवा कर्मणः फलनिष्पत्तेः परं एव जानीयुः।

मन्त्रकर्मणः बहुजनसाध्यत्वोपपादकमतम् आह - नैकस्येति विशालक्षः भारद्वाजमतं निरस्य स्वमतं प्रतिपादयति। एकस्यैव मन्त्रकरणं न फलसिद्धिं आप्नुयात् इति विशालाक्षमतम्। सर्वस्यापि राजकर्मणः सहायापेक्षत्वं मन्त्रिपुरोहितोत्पत्तावेव प्रतिपादितं। अज्ञातस्य ज्ञानं, ज्ञानस्य दृढीकरणं अर्थयोः द्विधाभावे संशयनिवृत्तिः अपूर्णतया अंशेन वा ज्ञातस्य समग्रज्ञानं इत्येतत्सर्वं मान्त्रिसाध्यं भवति। अतः बुद्धिमद्भिः सहैव मन्त्रमनुष्ठेयमिति अभिप्रैति विशालक्षः। श्लोकेन इदं तत्वं दृढयति च।

30. पदच्छेदः- न कञ्चित् अवमन्येत सर्वस्य शृणुयात् मतम्। पण्डितः बालस्य अपि अर्थवत् वाक्यं उपयुञ्जीत।

अन्वयः- कञ्चित् न अवमन्येत। सर्वस्य मतं शृणुयात्। पण्डितः बालस्य अपि अर्थवद्वाक्यं उपयुञ्जीत।

अर्थः- राजा कमपि पुरषं कदापि न अवजानीयात्। सर्वस्य अपि अभिप्रायं श्रद्धया शृणुयात्। यद्येकः बालः सारवत् वाक्यं वदति तदपि परिगणितव्यम् पण्डितैः।

विशालाक्षस्य मतं मन्त्रज्ञानं भवति, न तु मन्त्ररक्षणमिति पराशरशिष्याणां मतम्। एतदित्यादिना तेषां मतं उपपादयति च। राज्ञः यत् कार्यं मन्त्रयितुमुद्दिष्टं तत्सदृशं पुराणोपदिष्टं वा कार्यं उपदिश्य सः मन्त्रिणः पृच्छेत्। “इदं कार्यं पूर्वं एवं आसीत्। तत्तु एवंविधं भवितव्यम्। तदर्थं किं कुर्याम” इति तदा मन्त्रिणः यत् ब्रूयुः तदेव कुर्यात्। एवं मन्त्रज्ञानं मन्त्रगोपनं च सिद्ध्यति।

तदुभयं निरस्य तत्तत्कार्यज्ञैः सर्वैः सह मन्त्रकरणं अभिमतमिति स्थापयति पिशुनः। मन्त्रिणः रूपान्तराच्छादितं अवृत्तरूपेण वा पृष्टं कार्यं अनास्थया एव परिगणयेयुः। न तु आलोचनापूर्वं कथयन्ति वा प्रकाशयन्ति वा। अयं राजा अस्मासु अविश्वस्त;, अतः अनुष्ठेयमपि कार्यं अस्मान् न प्रकटयन्ति इति दोषः। अतः ये मन्त्रिणः येषु कर्मसु विश्वस्ताः निपुणाश्च भवन्ति तेषु कर्मसु तैः साकं मन्त्रं कुर्यात्। एवं एतैः मन्त्रिभिः सह पर्यालोचनात् मन्त्रज्ञानं मन्त्रगापनं च सिद्धयति।

एवं पूर्वचार्याणां मतमुपन्यस्य स्वमतं विस्तरेणोपपादयति कौटिल्यः। इदं पिशुनमतमपि न युक्तमिति कौटिल्यः। एवं तत्तत्कर्माभिप्रेतैः सह मन्त्रणे कार्याणां बहुत्वात् मन्त्रिणां अपि बहुत्वं तद्वारा अनवस्था च संजायेत। अतः त्रिभिः चतुर्भिर्वा मन्त्रिभिः सह मन्त्रं कुर्यादिति कौटिल्यस्य मतम्। अर्थकृच्छ्रेषु अथवा क्लेशनिर्धारणीयेषु कार्येषु एकेन सह मन्त्रणे कार्यनिश्चयः न संभवेत्। अपि च यद्येक एव मन्त्री तर्हि सः निष्प्रतिद्वन्द्वः संजायेत। स एक एव चरति, वक्ति अनुतिष्ठति च इति दोषः। यदि द्वाभ्यां मान्त्रिभ्यां सह मन्त्रयेत् तर्हि तौ द्वावपि संहत्य राजानं स्ववशं नीयेतां, विगृहीतौ तु अर्थात् विरुद्धौ तु कार्यहानिं च नीयेताम्। अतः त्रिभिः चतुर्भिर्वा मन्त्रिभिः सह मन्त्रणे राजावग्रहणादिमहादोषः कृच्छ्रणैव संभवेत्। यदि दोषः संजायते तर्हि कार्यनिर्णयः अतीव दुष्करः भवेत्। मन्त्ररक्षणमपि अतिक्लिष्टं भवत्। अतः देशकालकार्याणि अवधार्य एकेन सह द्वाभ्यां एक एव वा राजा यथामति मन्त्रं कुर्यात्।

अथ मन्त्रस्य पञ्चाङ्गत्वं उपपादयति कर्मणामित्यादिना। मन्त्रः कर्मणां आरम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गः भवति। तान् मन्त्रिषु एकैकशः पृच्छेत् संहतान् वा। एकैकस्यापि मतं सयुक्तिकं विमृश्य गृह्णीयात्। एवं निश्चितार्थः कालातिक्रमं न कुर्यात्। सुदीर्घं न मन्त्रयेत। अपकार्यजनबन्धुभिः सह न कदापि मन्त्रः कार्यः।

मन्त्रिसंस्थाविषये मतभेदान् स्वमतं च प्रतिपादयति कौटिल्यः- मन्त्रिपरिषदमित्यादिना। द्वादशसंस्थानं भवेत् मन्त्रिपरिषत् इति मनुशिष्यमतम्। किन्तु बृहस्पतिशिष्याणां मते मन्त्रिणां संस्था षोडशः भवेत्। औशनसां पक्षे विंशातिः भवति मन्त्रसंख्या। सर्वेषामपि आचार्याणां मतानि संगृह्य कौटिल्यः स्वमतमेवं उपस्थापयति - कार्यानुष्ठानृपुरुषसामर्थ्यं अनुसृत्य मन्तिरणां संख्या निर्णेतव्या इति।

एवं मन्त्रिपरिषदं नियुज्य नियुक्तानां तेषां मन्त्रिणां कर्तव्यकार्याणि विशदयति ते ह्यस्य इत्यादिना। ते राज्ञा अधिकारे नियुक्ताः मन्त्रिणः राज्ञः स्वपक्षं शत्रुपक्षं च समीक्षापूर्वकं चिन्तयेयुः। कर्मणां मध्ये अकृतस्य अनुष्ठानोपक्रमं, आरब्धस्य परिसमापनं, समाप्तस्य विशेषसंस्कारं, अनुष्ठितानां कर्मणां रक्षाविधिं च कुर्युः। समीपस्थैः मन्त्रिभिः सह सम्मन्त्र्य कार्यनिर्वहणं कुर्यात्, असन्निहितैः मन्त्रिभिः सह लोखप्रेषणेन कार्यसमालोचनं च कुर्यात्। इन्द्रस्य सभायां सहस्रं ऋषयः आसन्। इन्द्रः एतैः सहस्रैः ऋषिभिः कार्यदर्शनं कृतवानित्यतः द्व्यक्षः सः सहस्राक्ष इत्युच्यते।

बह्वपायसन्दर्भे राज्ञा किं कार्यमिति विवृणोति - आत्ययिके इत्यादिना। आत्ययिके अर्थात् प्राणापायशङ्कावहे कार्ये राजा मन्त्रिणः मन्त्रिपरिषदं वा आह्वयेत्। तत्र बहुतमाः यद् ब्रूयुः तत् अनुतिष्ठेत्। अथवा अभूयिष्ठा अपि यत् कार्यसिद्धिकरं ब्रूयुः तत् कुर्यात्। एवंकुर्वतः राज्ञः किं भवतीति श्लोकद्वयेन विवृणोति।

31. पदच्छेदः- न अस्य गुह्यं परे विद्युः छिद्रं विद्यात् परस्य च। गूहेत् कूर्मः इव अङ्गानि यत् स्यात् विवृतं आत्मनः।

अन्वयः- अस्य गुह्यं परे न विद्युः। परस्य छिद्रं विद्यात् च। अत्मनः यत् विवृतं स्यात् कूर्म इव अङ्गानि गहेत्।

अर्थः- राज्ञः रहस्यं कर्म न कदापि शत्रवः पश्येयुः, किन्तु राज्ञा सर्वदा शत्रूणां छिद्राणि द्रष्टव्यानि। कूर्मः यथा स्वाङ्गानि निगूहयति तथा राजा विवृतानि कार्याण निगूहयेत्।

32. पदच्छेदः- यथा हि अश्रोत्रियः श्राद्धं न सतां भोक्तुं अर्हति, एवं अश्रुतशास्त्रार्थः न मन्त्रं श्रोतुं अर्हति।

अन्वयः- अश्रोत्रियः यथा सतां श्राद्धं भोक्तुं न अर्हति एवं अश्रुतशास्त्रार्थः मन्त्रं श्रोतुं न अर्हति।

अर्थः- अब्राह्मणः जनः यथा ब्राह्मणानां श्राद्धं भोक्तुं अनर्हः भवति तथा शास्त्रज्ञानविहीनः कथञ्चिदपि मन्त्रं श्रोतुं अनर्हः भवति।

पञ्चदशोऽध्यायः समाप्तः

# द्वादशं प्रकरणम् - दूतप्रणिधिः

## षोडशोऽध्यायः

मन्त्रिनिश्चयानन्तरं दूतप्रेषणस्य आवश्यकतां निर्दिशति। निर्धारितमन्त्रः राजा तदनन्तरं दूतप्रेषणे सश्रद्धः भवत्। अमात्यगुणयुक्तः दूतः निसृष्टार्थः इत्युच्यते। तथा च निसृष्टार्थात् अर्धगुणहीनः शासनहर इत्युच्यते।

दूतकरणीयानि कार्याणि विशदीकरोति सुप्रतिविहितेत्यादिना। सम्यक् सज्जीकृतयानः शश्रूषादिकर्मकारयुक्तः, शय्यास्तरणगोणिकादिपरिवापयुक्तः सन् दूतः प्रतिष्ठेत। "शत्रुः यजमानसन्देशं एवं वाच्यः ततः सः एवं वदेत्, वदतः तस्य एवं प्रत्युत्तरं देयम् एवमुक्त्वा परः वञ्चनीयः इत्येवं पठन् एव दूतः शत्रुराज्यं प्रति गच्छेत्। अटवीपालान्तपालपुरमुख्यराष्ट्रमुख्यैश्च दूतः सख्यं प्राप्नुयात्। आत्मनः शत्रोः च निवेशयोग्यभूमिं युद्धभूमिं अपसारणमार्गं च दूतः जानीयात्। दुर्गराष्ट्रयोः इयत्तां, धान्यसुवर्णाद्युत्पत्तिं, जनानां जीविकां, रक्षां, शत्रुणां आक्रमणद्वारं च दूतः सम्यक् अवेक्षेत। अनुमतिं लब्ध्वा एव दूतेन शत्रुगृहं प्रवेष्टव्यम्। प्राणभये उपस्थिते अपि स्वस्वामिनः, सन्देशं यथानिर्दिष्टं कथयेत्। वाग्वदनदर्शनेषु च प्रसन्नता दूतोच्यमानवाक्यादरः, कुशलप्रश्नः यजमानगुणप्रस्तावे श्रद्धा स्वसमीपे आसनदानं, सत्कारः ईष्टभोजनादिसंविभागे दूतस्मरणं, विश्वासप्राप्तिः इत्यादयः शत्रुराजस्य सन्तुष्टिसूचकाः भवन्ति। तद्विपरीतं तु असन्तुष्टिं सूचयति। अतुष्टं शत्रुराजं दूतः एवं वदेत् - "दूतमुखाः भवन्ति राजानः। त्वं च अन्ये राजानश्च। अतः दूतानां स्वामिवदनस्थानीयत्वात् वधार्थं अयुधेषु उद्धृतेष्वपि यथोक्तं वदेयुः दूताः। दूतानां मध्ये चण्डालोऽपि अवध्यः भवति। कि पुनर्ब्राह्मणानां कथा। परस्य वाक्यमिदम्। एष दूतधर्मः भवति" इति।

येन केनापि कारणेन राज्ञा दूतस्य अविसर्जने तत्रावस्थितिक्रमः परिशीलनीयाः अंशाश्च विशदयति 'वसेदाविसृष्टः' इत्यादिना। यावद्वविसर्जनं दूतः परसन्निधौ वसेत्। पूजया गर्वितो न भवेत्। शत्रुसकाशं अहं बलवानिति मा विचारयेत्। परोक्तं अनिष्टमपि वाक्यं सहेत। मदिराक्षिं मद्यसेवनं च वर्जयेत्। असहायः एव स्वापं कुर्यात्। कुत इति चेत् स्वप्नप्रलापमदप्रलापाभ्यां भावज्ञानं प्रत्यक्षानुभूतम्। कृत्यपक्षस्य भेदनं अकृत्यपक्षे तीक्ष्णरसदादिगूढपुरुषनियोगं, जनानां स्वामिनि रागापरागौ द्वेषस्थानं च तापसवैदेहक्यञ्जनाभ्यां गूढपुरुषाभ्यां दूतः जानियात्। अथवा तापसवैदेहकयोः शिष्यैः भिषग्वेषैः पाषण्डवेषैः उथयवेतनैश्च परवृत्तान्तं उपलभेत। तैः सह साम्भाषणासौकर्ये याचकमत्तोन्मतसुप्तत्रलापैः नदीतिरस्थजपमण्डपमुनिगृहादिषु देवगृहेषु च चित्रलेख्यसंज्ञाभिः चारं विद्यात्। शत्रुवृत्तान्तं ज्ञात्वा तदनुसारं भेदोपायं प्रयुञ्जीत। शत्रुराजः यदि दूतं प्रति स्वराज्यस्य प्रजानां परिमाणं पृच्छति चेत् न कदापि आचक्षीत। तदा भवता चारचक्षुषा सर्वं विदितं, न किञ्चिदत्र अविदितं इत्युत्तरं ब्रूयात्। अन्यथा दूतकार्यसिद्धिकरं यत्किञ्चित् ब्रूयात्।

शत्रुराजेन दूतस्य चिरकालोपरोधे तत्कारणपरिचिन्तनं दूतेन कथं कार्यमिति विवृणोति 'कार्यस्ये' त्यादिना। अप्राप्तकार्यसिद्धौ दूतं प्रतिजिगमिषुं शत्रुराजः यदि नानुमिनाति तदा दूतः एवं चिन्तयेत्। "मे स्वमिनः व्यसनं आसन्नं ज्ञात्वा वा, आत्मनः व्यसनं परिहर्तुं वा राजा मामेवं प्रतिरुणद्धि। शत्रुमित्रं, शत्रुमित्रमित्रं, यजमानद्रोहार्थं

प्रोत्साहयितुकामः वा असौ राजा एवं करोति। अथवा अन्तःकोपं जनयितुकामः असौ मां उपरुणद्धि। आटविकं युद्धाय प्रेरयितुकामः अथवा स्वामिनः पुरस्तान्मित्रं पृष्ठतोमित्रं वा हन्तुकामः मामेवं उपरुणद्धि। अथवा शत्रुराजस्य संप्राप्तं अभियानं विनाशयितुं अयं मां उपरुन्दाति? अथवा शत्रुराजस्य संप्राप्तं अभियानं विनाशयितनं अयं मां उपरुन्धति? युद्धेन जायमानः सस्यकुप्यपरिक्षयः मा मां बाधिष्ठेति मत्वा, अथवा दुर्गकर्म कर्तुकामः अथवा सैन्यवृद्धिं कर्तुकामः वा मां उपरुन्धति। अथवा स्वसैन्यस्य शत्रुषु विक्रमणाय उचितदेशकालाबुदीक्षमाणः मां उपरुणद्धि किम्? परिभवेन सहसंवासप्रीत्या वा मां उपरुणद्धि" इति।

उपरोधस्य कारणं ज्ञात्वा दूतः तत्र वसेत्। अथवा अपसरेत्। अथवा स्वस्वाम्यर्थं प्राप्तुं तत्रैव वसेत्। अनिष्टं स्वामिशासनं उक्त्वा आत्मनो बन्धनं वा वधः वा असौ राजा कुर्यादिति आशङ्‌य अपगच्छेत्। अन्यथा शत्रुणा नियम्येत।

श्लोकद्वयेन दूनकर्म संक्षिपति।

33, 34 पदच्छेदः- प्रेषणं सन्धिपालत्वं प्रतापः मित्रसंग्रहः उपजापः सुहृद्भेदः दण्डगूढातिसारणम्।

बन्धुरत्नापहरणं चारज्ञानं पराक्रमः समाधिमोक्षः दूतस्य कर्म योगस्य च आश्रयः।

अन्वयः- प्रेषणं सन्धिपालत्वं प्रतापः मित्रसंग्रहः उपजापः सुहृद्भेदः दण्डगूढातिसारणं, बन्धुरत्नापहरणं चारज्ञानं पराक्रमः समाधिमोक्षः योगस्य आश्रयः च दूतस्य कर्म।

अर्थः- शत्रुदेशगतागतं, कृतसन्धिरक्षणं, यथावसरं शत्रौ विक्रमणं, मित्रसंग्रहः, कृत्यभेदनं, सुहृद्भेदः सेनायाः तीक्ष्णरसदादिपराक्रमः, बन्धूनां रत्नानां च स्वीकारः, चारप्रवृत्तिज्ञानं, यथावसरं विक्रमणं, पुत्रादिनां समाधीनां मोचनं, अथर्वोक्तस्य आभिचारकर्मणः आचरणं इत्येतानि दूतस्य कर्म भवति।

३५. पदच्छेदः- स्वदूतैः कारयेत् एतत् परदूतान् च रक्षयेत् प्रतिदूतापसर्पाभ्यां दृश्याहश्यैः च रक्षिभिः।

अन्वयः- एतत् स्वदूतैः कारयेत्। प्रतिदूतापसर्पाभ्यां दृश्यादृश्यैः रक्षिभिः च परदूतान् रक्षयेत् च।

अर्थः- पूर्वोक्तं सर्वं दूतकर्म राजा स्वदूतैः कारयेत्। प्रतिदूतप्रतिचाराभ्यां स्वदेशस्थैः परदेशे परसेवकच्छद्मभिः रक्षिपुरुषैः च परदूतान् रक्षयेत् च।

षोडशोऽध्यायः समाप्तः।

त्रयोदशं प्रकरणम्। राजपुत्ररक्षणम्।

सप्तदशोऽध्यायः।

राजपुत्रेभ्यः राज्ञः रक्षणं अभिधीयते इति राजपुत्ररक्षणम्। सबन्धुभ्यः प्रजाभ्यश्च रक्षितः राजा राज्यं स्वप्रजाश्च तेभ्यः रक्षितुं शक्तः भवति इत्याह रक्षित इत्यादिना। आसन्नेभ्यः शत्रुभ्यश्च रक्षितः राजा राज्यं रक्षति। प्रथमतः भार्येभ्यः ततः पुत्रेभ्यः च। दारेभ्यः रक्षत्रणं निशान्तप्रणिधिः इत्यध्याये वक्ष्यति। पुत्रेभ्यः रक्षणं अत्र विवृणोति।

राज्ञः पुत्रेभ्यः रक्षणाय पुत्रशिक्षां उपपादयति जन्मप्रभृति इत्यादिना। जन्म आरभ्यैव राजपुत्राः रक्षणीयः। कुलीरसमानस्वभावाः  जनकं मारयित्वा भक्षयन्ति राजपुत्राः, अर्थात् नाशयन्ति जनकम्। पितुः पुत्रेषु जातेषु स्नेहः न उदेति चेत् तेषां रहसि वधः श्रेयान् इति भारद्वाजमतम्। नैतद्युक्तमिति विशालाक्षः। निरपराधशिशुमारणं महापापाय क्षत्रियकुलनाशाय च प्रभवेत्। अतः तान् राजकुमारान् अन्तःपुरे क्वचित् अवरोधं युक्तम्। सर्पसहवासवत् नितरां भयावहं भवतीदं इति पराशरशीष्याः वदन्ति। स्ववधभयात् एव राजा मामेवं उपरुणद्धि इति विचिन्त्य सः पुत्रः विक्रममेव प्रयुञ्जीत। अतः पुत्राणां राष्ट्रसीमापालकस्य दुर्गे वासः अभिप्रेतः।

नारदमते दूरस्थितादपि पुत्रात् भेतव्यं इति। यथा मेषस्य पुरस्थं मेषं मूर्ध्ना जिघट्टयिषा दूरापसरणं पुरस्तादभिपतने शक्त्यधिकाधायकत्वं तथा राजपुत्रस्य दूरान्तपालादुर्गे अवरोधनं पितृजिधांसोः अधिकबलाधायकं भयस्थानं च भवति। अतः दूरदुर्गे अवरोधः न स्वीकार्य इति। एवं स्थिते सः कुमारः अन्तपालसखः भवेत्। अतः मामन्तगृहे वासः श्रेयान् इति।

इदं गोवत्सबन्धनस्थानतुल्यं भवतीति मन्यते कौणपदन्तः। अपि च एको दोषश्च - यथा वत्समुपयुज्य धेनोः क्षीरं दुह्यति तथा एनं कुमारमुपयुज्य राज्ञः धनं सामन्तः दुह्येत्। अतः मातृबन्धूनां समीपे वासः उचितः इति कौणपद्तमतम्। इदं मतं दूषयित्वा वातव्याधिः एवं वदति। 'ध्वजस्थानमेतत्' इति। अदितिकौशिकवत् एनं कुमारं प्रदर्शयित्वा मातृबान्धवाः स्वाभीष्टं अर्थं याचेरन्। अतः कुमारं स्त्रीसेवादिषु यथेच्छासञ्चाराय अवसृजेत्। एवं सुखोपभागतत्परः राजानं न दुह्येत्।

एवं अन्याचार्याणां मतान्युपन्यस्य स्वमतमुपस्थापयति कौटिल्यः- इदं ग्राम्यधर्मावसर्जनं राजपुत्रस्य जीवत एव मरणं भवति। व्यसनोपहतबुद्धिसत्वशरीरत्वात् मरणतुल्यं भवति। अपि च वम्रिचर्वितं दारु, यथा स्पृष्टमात्रं भग्नं भवति तथा शास्त्रसदाचारशिक्षितकुमारं राजकुलं शत्रुभिः जिघीषितमात्रं परिध्वस्तम् भवति। तस्मात् गर्भाधान प्राक्कालादेव राजपुत्ररक्षणाय  प्रयत्नः कार्यः। अत्र आर्तवदर्शनषोडशदिनात्मके गर्भाधानयोग्ये काले एवं इन्द्रबृहस्पतिदेवताकं हविः साधयेयुः। एवं जातगर्भायां शिशुवैद्यः गर्भपोषणे प्रसवे च विशिष्य यत्नं कुर्यात्। प्रसूतायाः पुरोहितः पुत्रसंस्कारान् कुर्वीत। विद्याग्रहणधारणसमर्थं कुमारं विद्यासु शिक्षयेयुः।

शिक्षितस्यापि कुमारस्य स्वपितृद्रोहबुद्ध्यनुत्पादनाय किं कर्तव्यमिति चिन्तयति सत्रिणमेकं  इत्यादिना। एकः सत्री एवं गृहीतविद्यं कुमारं मृगयाद्यूतमद्यस्त्रीभिः प्रलोभयेत्। अपि च पितरं आक्रम्य राज्यग्रहणाय च

प्रलोभयेत्। अन्यः कोऽपि सत्री इदं प्रतिषेधयेत्। इदं आम्भाचार्यानुयायिनां मतम्।

अज्ञानिनः पितृद्रोहरूपपापकर्मणः उपदेशः परमनर्थः भवति। यथा नवं द्रव्यं येन जलघृतदिना लिप्यते तत्तद् आपिबति, तथा नवबुद्धिः राजपुत्रः यद्यत् उच्यते तत्तत् सर्वं शास्त्रमिव अभिजानाति। तस्मात् धर्मं अर्थं च अस्य उपदिरोत्, न तु अधर्मं अनर्थं च।

राजपुत्रे स्वत एव दुर्मार्गे सति तस्य सत्रिद्वारा समीकरणं कथमिति विकृणोति सत्रिणस्त्वेनमित्यादिना। त्वत्सेवकाः वयं इति वदन्तः परस्त्रीमद्यादिभ्यः एवं वारयेयुः। थौवनमदात् परस्त्रीगमनोद्युक्तं कुमारं अभिजातस्त्रीवेषधारिणीभिः स्वभावादशुचिभिः स्त्रीभिः शून्यगृहेषु उद्वेजयेयुः। विरसद्रव्ययुक्तेन मद्येन च उद्वेजयेयुः। कापाटिकैः द्यूतकामं कुमारं द्यूतादपि उद्वेजयेयुः। मृगयाकामं चोरवेषैः प्रतिरोधकव्यञ्जनैः राजनि द्रोहबुद्धिं तथा इति' उक्त्वा तच्छन्दानुवृत्या तस्मान्निवर्तयेयुः। अनेष्टव्यः राजा, पिपवधसमुद्यमे विफले तव वधः फलिते पितृवधपातकिनः तव नरकप्राप्तिः, प्रजाभिः एकैकत्सष्टप्रक्षेपेण धातेश्य भवेत्। एवं कृतेऽपि यः पितरि निस्नेहः एव पितुः प्रियः एकश्च पुत्रो भवेत् तदा किं करणीयमित्याह विरागं इत्यादिना। विरागं एकपुत्रं प्रियं राजा कारागृहे वासयेत्। यदि राज्ञः अनेके पुत्राः सन्ति तर्हि एवं विरागिणं पुत्रं राजा म्लेच्छदेशं अन्यदेशं वा प्रेषयेत्। यत्र देशे उचिताहारसौकर्यं वा अचितभोग्यवस्तुजातं वा प्रजानां उपप्लवः वा न स्यात्। गुणसमपन्नं पुत्रं सैनापत्ये यौवराज्ये नियुञ्जीत।

अथ पुत्रभेदाः तेषां लक्षणानि च विवृणोति बुद्धिमानित्यनेन, बुद्धिमान् आहार्याबुद्धिः, दुर्बुद्धिः इति पुत्राणां त्रैविद्यं भवति। उपदिश्यमानधर्मार्थज्ञानानुष्ठाननिष्ठः भवति बुद्धिमान्। ज्ञानमात्रवान् किन्तु अनुष्ठानविमुखः भवति आहार्यबुद्धिः। नित्यप्रमादी धर्मार्थद्वेषी चा भवति दुर्बुद्धिः। स दुर्बुद्धिः यदि एकपुत्रः अस्य दुर्बुद्धेः पुत्रोत्पतौ यत्नं कुर्यात्। अथवा 'पुत्रिकापुक्रान्' अर्थात् अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति इति निस्चित्य पुत्र्यां जातः पुत्रः राजा भवेत्। यदि राजा पुत्रीरहितः अथवा वृद्धभावात् व्याधितः वा गर्भाधानाक्षमः भवति तदा मातृबन्धुना स्वकुलजातेन गुणवत्सामन्तेन वा अन्यतमेन राजमहिष्यां बीजमुत्पादयेत्। न कथञ्चिदपि अशिक्षितमेकं पुत्रं राज्ये निवेशयेत्। पुत्राणामेकत्र मेलनेन विनयाधानपूर्वकं ज्येष्ठस्य वा सर्वेषामपि वा राज्यभागित्वकरणस्य युक्तिं विशदयति श्लोकद्वयेन।

36. पदच्छेदः- बहूनां एकसंरोधः पिता पुत्रहितः भवेत्। अन्यत्र आपदः ऐश्वर्यं ज्येष्ठभागि तु पूज्यते।

अन्वयः- बन्हूनां (मध्ये) एकसंरोधः (कर्तव्यः)। पिता आपदः अन्यत्र पुत्रहितः भवेत्। ऐश्वर्यं ज्योष्ठभागि तु पूज्यते।

अर्थः- बहूनां पुत्राणां मध्ये एकस्य दुर्बुद्धेः प्रत्यन्तादिष्ववरोधः कर्तव्यः। पिता अनापदि पुत्रानुकूलवृत्तिः भवेत्। बहुषु पितृप्रियेषु पुत्रेषु सत्सु राजत्वं ज्येष्ठपुत्राश्रितमेव श्रेयान् भवति।

37. पदच्छेदः- कुलस्य वा भवेत् राज्यं कुलसङ्घः हि दुर्जयः। अराजव्यसनाबाधः शश्वत् आवसति क्षितिम्।

अन्वयः- राज्यं कुलस्य भवेत्, हि कुलसङ्घः दुर्जयः। अराजव्यसानाबाधः शश्वत् क्षितिं आवसति।

अर्थः- अथवा राज्यं बहुपुत्रसङ्घस्य भवेत्। तथाकरणे कुलात्मकः राष्ट्रनेता शत्रुणा जेतुं अशक्यः भवेत्। एवं सति राजव्यसनदोषनिमित्तायाः जनपीडायाः अभावः सर्वदा भूमिं अधितिष्ठति।

सप्तदशोऽध्यायः समाप्तः।

# चतुर्दशपञ्चदशे प्रकरणे। अवरुद्धवृत्तम् अवरुद्धे च वृत्तिः।
# अष्टादशोऽध्यायः।

अविनितेन राज्ञा निराचिकीर्षितस्य तत्पुत्रस्य वृत्तिक्रमं अत्र निर्दिश्यते। अवरुद्धः राजपुत्रः अननुरूपे कर्मणि राज्ञा नियुक्तः प्रणविनाशकं, प्रकृतिकोपनं, पातकजनकं वा यत्किञ्चित् न भवेच्चेत्, पितृनियोगं अनुसरेत्। पुण्ये कर्माणि नियुक्तश्चेत् तत्कर्मानुष्ठानाय एकं पुरुषं पितृसकारात् याचित्वा लभेत। एवं पित-नियोगं मविशेषमनुष्ठाय स्वकर्मोत्यादितं हृद्यं प्रशस्तं च कर्मफलं सम्मानरूपेण लब्धं बस्तु च पित्रे समर्पयेत्। एवं कृतेऽपि अतुष्यन्तं स्वमातृव्यतिरिक्तायां पत्न्यां इतरे पुत्रे वा अधिकं स्निह्यन्तं राजानं 'तपसे वनं गन्तुं' अनुज्ञां पृच्छेत्। तथापि आर्जवमप्रतिपद्यमाने पितरि आत्मबन्धनहननशङ्कायां वा जातायां तं पितरं अभिद्रोग्धुं गुणवन्तं न्यायवृत्त धार्मिकं शरणागतानां स्वीकर्तारं विश्वस्थं सामन्तं आश्रयेत। स्वार्जितसैन्यसम्पद्युक्तः प्रकृष्टवीरपुरुषकन्यकायाः परिणयं आटविकसख्यं स्वपितृकृत्यवर्गस्वीकरणं च सहायवृद्ध्यर्थं कुर्यात्। यदि राजपुत्रः अलब्धकोशदण्डसहायः एकाकी भवेत् तर्हि कोशार्जनाय सुवर्णरजतादीनां क्रयविक्रयेण रत्नादिखनिव्यापारं कृत्वा वा उपजीवेत्।

धर्मविरुद्धसंघानां धनं अश्रोत्रियोपभोग्यं देशद्रव्यं समृद्धधनायाः विधवाया : सम्मदं वा गूढमनुप्रविश्य अपहरेत्। अपि च वणिक् संघस्य यानपात्राणि आक्रम्य मदकरसदानेन वञ्चयित्वा तेषां द्रव्यं अपहरेत्। अथवा पारग्रामिकं योगं अनुतिष्ठेत् । मातुः सेवकजनानुकूलेन स्ववृध्यर्थं यतेत। तथा च तक्षैः चित्रकारैः, गायकैः वैद्यैः, पुरावृत्तकथनोपजीविभिः क्षपणकबौद्धभिक्षुप्रभृतिभिः च साकं नद्वेषधारी सन् तद्वेषधारिभिः सुहृद्भिः साकं राज्ञः अपकारस्थाने प्रविश्य आयुधैः तं प्रहृत्य एव ब्रूयात् - अहं राजकुमारः अस्मिन् राज्ये। सहभोग्यमिदं राज्यं एक एव भोक्तुं नार्हः। अत्र ये राज्यभरणाय अभिलषान्ति तान् अहं द्विगुणवेतनं दत्वा अत्र स्थापयित्वा पूजयिष्यामि। इदं अवरुद्रवृत्तं भवति।

अवरुद्धे पुत्रे राजा कथं वर्तयेदित्युच्यते अवरुद्धं तु इत्यादिना। अवरुद्धं पुत्रं अमात्यादिपुत्राः अपसर्परूपेण उपगम्य राजसन्निधिं आनयेयुः। राजपूजिता माता वा अवरुद्धं राजपुत्रं प्रतिपाद्य पितुरन्तिकं आनयेत्। राज्ञा परित्यक्तं राजपुत्रं आयुधविषप्रयोगाभ्यां गुढपुरुषाः हन्युः। अपरित्यक्तं कुमारं समानप्रकृतिभिः स्त्रीभिः मद्येन आस्वेटनेन वा आसक्तिं कारयित्वा बद्ध्वा रात्रौ राजान्तिकं प्राययेयुः।

38. पदच्छेदः- उपस्थितं च राज्येन मदूर्ध्वं इति सान्त्वयेत्। एकस्थं अथ संरुन्ध्यात् पुत्रवान् वा प्रवासयेत्।

अन्वयः- उपस्थितं मदूर्ध्वं राज्येन इति सान्त्वयेत्। अथ एकस्थं पुत्रं संरुन्ध्यात् । पुत्रवान् वा प्रवासयेत्।

अर्थः- तथा स्वसमीपं आगतं धार्मिकं पुत्रं राजा मदुत्तरकाले राज्यमिदं त्वदीयं भवेदिति समाश्वासयेत्। अथ अभ्रातृकं अधार्मिकं पुत्रं राजा कारागृहे निवेशयेत्। बहुपुत्रवान् तु राजा अधार्मिकं पुत्रं हन्यात्।

अष्टादशोऽध्यायः समाप्तः।

# षोडशं प्रकरणम्। राजप्रणिधिः।

# एकोनविंशोऽध्यायः।

राज्ञः प्रणिधिः व्यापारमुच्यते अस्मिन्नध्याये। राजा स्वकर्माणि यद्युत्साहशाली भवेत् तर्हि तद्भृत्याः अपि उत्साहवन्तः भवेयुः। यदि राजा आलस्यात् स्वकर्मसु न व्याप्रियन्ते तर्हि भृत्या अपि तथैव। अतः राज्ञः कर्माणि भक्षयन्ति अर्थात् नाशयन्ति च। एवं भूतः राजा शत्रुभिः वञ्च्यते च। अतः राज्ञां आत्मनः कर्मानुष्ठानमवश्यं विधेयं भवति।

दिवसस्य अष्टधा विभागेन राज्ञा कार्यक्रमविधानं कार्यम्। अहः रात्रिं च नालिकाप्रमाणेन प्रत्येकं अष्टौ भागेन विभजेत्। छायाप्रमाणेन पूर्वं अहर्भागं त्रिपौरुषी, पौरुषी, चतुरङ्गुला, च्छायामध्याह्नः इति चतुर्धा विभजते। अनयैव रीत्या उत्तरं अहर्भागमपि विभक्तम्। उत्तरेऽपि चतुरङगुला, पौरुषी, त्रिपौरुषी, दिनान्त इति चतुर्धा।

दिवसस्य अष्ठभागेषु पूर्वे रक्षाविधानं आयव्ययौ च पशेचेत्। द्वितीये पौराणां ग्रामवासिनां च कार्याणि शणुयात्। तृतीये भागे स्नानं भोजनं वेदाध्ययनं च कुर्वित। चतुर्थे भागे गतदिवसे समाहृतं धनं स्वीकुर्यात्ः, तथा कार्यविशेषेषु अध्यक्षान् च कुर्वीत। पञ्चमे भागे मन्त्रिभिः साकं पत्रद्वारा मन्त्रयेत् चारेभ्यो रहसि उपदेश्यानि कार्याणि शृणुयात्। षष्ठे भागे स्वच्छन्दावस्थानं मन्त्रं वा कुर्यात्। सप्तमे चतुरङ्गयुतां सेनां पश्येत्। अष्टमे सेनापत्या सह विक्रमं समालोचयेत्। अह्वाववसिते सन्ध्यावन्दनं यथाविधि कुर्यात्।

रात्रावनुष्ठेयकार्याणि विवृणोति प्रथमे इत्यादिना रात्रेः प्रथमभागे राजा गुह्यचरान् संपश्येत्। द्वितीये तु गीतवाद्यश्रवणसुखं अनुभवन्नेव शयितः भवेत्। चतुर्थ पञ्चमे च रात्रिभागयोः राजा स्वापं कुर्यात्। षष्ठे भागे गीतवाद्याभ्यां प्रतिबोधितः अर्थशास्त्रं तद्दिनकार्य़ाणि कार्याणि च सञ्चिन्तयेत्। सप्तमे भागे मन्त्रालोचनं गूढपुरुषप्रेषणं च कुर्यात्। अष्टमे रात्रिभागे ऋत्विगाचार्य़पुरोहितयुक्तः माङगलिकमन्त्रपाठपूर्वाणि आशीर्वचनानि स्वीकुर्यात्। वैद्यं माहानसिकं ज्योत्स्यं च पश्येत्। तदनन्तरं वत्ससहितां धेनुं वृषभं च प्रदक्षिणीकृत्य आस्थानमण्डपं गच्छेत् । आत्मनः कार्यानुष्ठानशक्तिमनुसृत्य अह्नः रात्रेश्च विभागं कृत्वा कार्यणि कुर्यात्।

आस्थानमण्डपवर्तनकाले सर्वेषामपि सुखदर्शनाय राज्ञा करणीयानि कार्याणि विशदीकरोति उपसथानगत इत्यादिना। आस्थानसभां प्रविश्य राजा कार्यार्थिनां सभाद्धारे यथा क्लेशः न समजायेत तथा कारयेत्। यदा राजा दुर्लभदर्शनः तदा परिजनैः कार्याकार्ययोरकरणं क्रियेत। एवं कार्यकरणे राजा प्रकृतिकोपस्य (अमात्यरोषस्य) शत्रोः वा वशं गच्छेत्। अतः राजा देवकार्यं आश्रमकार्यं, पाषण्डकार्यं, श्रोत्रियकार्यं, पशुकार्यं, पुण्यस्थानकार्यं, ब्बालकार्यं, वृद्धकार्यं, रोगिकार्यं, दुःखाभिभूतकार्यं, अनाथकार्यं स्त्रीणां कार्यं च क्रमशः पश्येत्, कार्यस्य महत्वापेक्षया आत्ययिकवशात् च। अवश्यकरणीकार्याणां अकरणे अनर्थहेतुतां, तत्तत्कार्यविशेषनियमांश्च आलोच्य राज्ञा कार्याणि विचिन्तनीयानि इति विशदयति श्लोकैः।

39. पदच्छेदः- सर्वं आत्ययिकं कार्यं शृणुयात् न अतिपापयेत्। कृच्छ्रसाध्यं अतिक्रान्तं असाध्यं वा विजयते।

अन्वयः- सर्वं आत्ययिकं कार्यं शृणुयात्, न अतिपातयेत्। अतिक्रान्तं कृच्छ्रसाध्यं असाध्यं वा विजायते।

अर्थः सर्वं लघु गुरु च अवश्यकार्यं राजा श्रुत्वा अनुतिष्ठेत्। न अतिक्रामयेत्। अतिपातितकालं किमपि सुकरं कार्यं कालान्तरे कष्टसाध्यं असाध्यं वा भवेत्।

40. पदच्छेदः- अग्न्यागारगतः कार्यं पश्येत् वैद्यतपस्विनाम्। पुरोहिताचार्यसस्वः प्रत्युत्थाय अभिवाद्य च।

अन्वयः- अग्न्यागारगतः पुरोहिताचार्यसस्वः प्रत्युन्थाय अभिवाद्य च वैद्यतपस्विनां कार्यं पश्येत्।

अर्थः- अग्निहोत्रशालागतः पुरोहितेन आचार्येण च अनुयातः राजा असनादुत्थाय अभिवादनं कृत्वा च विदुषां तापसानां च कार्याणि चिन्तयेत्।

41. पदच्छेदः- तपस्विनां तु कार्याणि त्रैविद्यैः सह कारयेत्। मायायोगाविदां च एव न स्वयं कोपकारणात्।

अन्वयः- त्रैविद्यैः सह तवस्विनां कार्याणि तु कारयेत्। मायायोगविदां च स्वयं न (कारयेत्), कोपकारणात्।

अर्थः- सामर्ग्यजुर्वेदपण्डितैः साकं तापसानां कार्याणि विचिन्तयेत्। मायाप्रयोगाभिज्ञानां तु कथञ्चिदपि राजा स्वयं न कुर्यात् कुत इति चेत् कोपकारणात्।

42. पदच्छेदः- राज्ञः हि व्रतं उत्थानं यज्ञः कार्यानुशासनम्। दक्षिणा वृत्तिसाम्यं च दीक्षितस्य अभिषेचनम्।

अन्वयः- उत्थानं, यज्ञः, कार्यानुशासनं, दक्षिणा, वृत्तिसाम्यं दीक्षितस्य अभिषेचनं च राज्ञः व्रतम्।

अर्थः- उद्योगः यागानुष्ठानं व्यवहारनिर्णयः, दानं, शत्रौ मित्रे च गुणदोषापेक्षया तुल्यव्यवहारः दीक्षान्तमवभृथस्नानं च राज्ञः व्रतम् भवति।

43. पदच्छेदः- प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्। न आत्मप्रियं हितं राज्ञः प्रजानां तु प्रियं प्रियम्।

अन्वयः- प्रजासुखे राज्ञः सुखम्, प्रजानां हिते च हितम्; राज्ञः आत्मप्रियं हितं न, प्रजानां प्रियं तु प्रियम् (भवति)।

अर्थः- प्रजानां सुखे सति राज्ञः सुखं जायते। प्रजानां हिते सति राज्ञः हितं च अस्ति। राज्ञः आत्मप्रियं हितं न भवति। किन्तु प्रजानां प्रियमेव राज्ञः प्रियं भवति।

44. पदच्छेदः- तस्मात् नित्योत्थितः राजा कुर्यात् अर्थानुशासनं, अर्थस्य मूलं उत्थानं अनर्थस्य विपर्य़यः।

अन्वयः- तस्मात् राजा नित्योन्थितः अर्थानुशासनं कुर्यात्। उत्थानं अर्थस्य मूलं (भवति)। विपर्ययः अनर्थस्य (च)।

अर्थः- पूर्वोक्तात् कारणात् राजा नित्योद्योगी भूत्वा अर्थव्यवहारं कुर्यात्। उद्यमः अर्थसिध्युपायः भवति। अनुत्थानं अनर्थस्य विनाशस्य कारणं च भवति।

45. पदच्छेदः- अनुत्थाने ध्रुवः नाशः प्राप्तस्य अनागतस्य च। प्राप्यते फलं उत्थानात् लभते च अर्थसम्पदम्।

अन्वयः- अनुत्थाने प्राप्तस्य अनागतस्य च नाशः ध्रुवः। उत्थानात् फलं प्राप्यते, अर्थसम्पदं लभते च।

अर्थः- आलस्यात् उद्यमस्य अकरणे सिद्धस्य, प्राप्तस्य च अर्थस्य नाशः निश्चितः भवति। उद्यमेन सद्य एव फलं लभ्यते, अर्थप्राप्तिश्च संजायते। अप्राप्तस्य प्रापणं, प्राप्तस्य रक्षणं, समृद्धेः प्रापणमिति उत्थानस्य त्रैकालिकी सिद्धिर्भवति।

एकोनविंशोऽध्यायः समाप्तः

# सप्तदशं प्रकरणम्। निशान्तप्रणिधिः।

## विंशोऽध्यायः।

निशान्तं राजभवनं तस्य प्रणिधिः तत्सम्बन्धमनुष्ठानं अस्मिन् अध्याये प्रतिपाद्यते। तत्र च अन्तःपुर-शय्यागृहादिनिर्माणक्रममभिधीयते वास्तुकप्रशस्त इत्यादिना। वास्तुविद्याभिज्ञैः प्रशंसिते देशे सालपरिखाद्वारयुक्तं अनेकप्रकोष्ठकैर्युक्तं अन्तःपुरं संविधेयम्। कोशागारविधानमनुसृत्य राजा वासगृहं कारयेत्। भूमिं स्वात्वा खन्तः भूमिगृहं वा कारयेत्। एतच्च भूमिगृहं उत्कीर्णदेवताप्रतिमाङ्कं दारुलोहादिमयाच्छादनरूपद्वारयुक्तं अनेकसुरुङ्कसञ्चारमार्गयुक्तं भवेत्। गूढैः भित्यन्तरगतैः सोपानैः सहितं सुषिरवता स्तम्भेन प्रवेशनिर्गमस्थानसहितं वासगृहं कारयेत्। अपि च वासगृहं आपत्प्रतीकारार्थं यन्त्रबद्धतलावपातम् च कारयेत्। अर्थात् इदं वासगृहं यन्त्रस्त्रंसने अधोदेशनिपातुकं कारयेत् किमर्थमितिचेत् अधोदेशस्थितशत्रुहननार्थम्। एतत् यन्त्रबन्धनं आदावेव क्रियेत। अथवा आपत्काले क्रियेत। पूर्वोक्तं वासगृहकापट्यप्रकारं परोऽपि तुल्यशास्त्रवित् इति विज्ञायैव कारयेत्। एवं सति स्वबुद्ध्यनुसारं वासगृहं अन्यथाक्रियेत।

एवं निर्मितस्य राजन्तःपुरस्य अग्निभयपरिहाराय उपायं विशदयति - मानुषेणेति। मानुषाग्निना - शत्रुहतस्य शूलारोपितस्य वा मनुष्यस्य अस्थिना कल्माषवेणुना संघर्षादुत्थितेन अग्निना - त्रिवारं प्रदक्षिणं परिगतं अन्तःपुरं अन्योऽग्निः न दहति। अत्र अन्तःपुरे अन्योऽग्निर्न ज्वलति। विद्युदुभूताग्निना दग्धद्रुमभस्मना वर्षोपलजलयुक्तेन कृतलेपनं अन्तःपुरं अन्योऽग्निः न दहति।

विषभयप्रतीकारोपायाः विषज्ञानोपायाश्च विशदीक्रियन्ते जीवन्तीत्यादिना। गूडूचीशङ्खनीलोघ्रकणवीरोपारिजातवृक्षरुहैः अक्षीबजातपिप्पलस्य प्रतानेन वा संरक्षिते गृहे सर्पाः विषाणि वा न बाधन्ते। मार्जारमयूरनकुलमृगाः सर्पान् वक्षयन्ति। शुकशारिकादयः पक्षिणः विषशङ्कायां आक्रन्दन्ति। विषसामीप्ये क्रौञ्चः विह्वलीभवति। जीवञ्जीवकः खिन्नो भवति विषसकाशे। मत्तकोकिलः विषदर्शने म्रियते। चकोरस्य अक्षिणी रागहीने जायेते। इदं सम्यक् मनसि धृत्वा अग्निविषसर्पेभ्यः प्रतिविधिं कुर्यात्।

अन्तःपुरे पश्चात्पूर्वमध्यभागेषु कल्पनीयसन्निवेशमाह पृष्ठत इत्यादिना। अन्तःपुरस्य पश्चाद्भागे पृथक् निर्मितायां कक्ष्यायां स्त्रीनिवेशः, गर्भिणीनां वासस्थानं, तस्य पृष्ठतः रोगिणीनां वासस्थानं, वैद्यैरपि परित्यक्तानां देवीनां स्थानं च भवति। ततः परं उद्यानतटाकादिकं च भवति। एतेषां बाहिर्भागे कन्यकापुरं कुमारपुरं च कारयेत्। पुरोभागे अलङ्कारभूमिः मन्त्रगृहम्, आस्थानमण्डपः युवराजस्य कक्ष्या कार्याध्यक्षाणां गृहं च भवेयुः। सर्वेषामपि कक्ष्यणां अन्तरा कञ्चुकिप्रभृतयः अन्तःपुराधिकृताः तिष्ठेरन्।

राज्ञः देवीदर्शने पालनीयाः क्रमाः विशदीक्रियन्ते अन्तर्गृहगत इत्यादिना। स्वावासस्थितः राजा आप्तवृद्धपरिचारिकाभिः परिशोधितां देवीं पश्येत्। कथञ्चिदपि राजा कांचिदपि देवीं द्रष्टुं तद्गृहं न गच्छेत्। देवीगृहगमने को दोष इति चेत् पुरा कलिङ्गेश्वरः भद्रसेनः देवीगृहं प्रविष्टः तत्र निलीय स्थितेन सोदर्येण वीरसेनेन

हतः। अपि च मातुः शय्यान्तर्निलीनः पुत्रः स्वपितरं कारूशदेशाधिपं हतवान्। काशीराजस्य देवी लाजान् मधुना मिश्रिकृत्य इति व्याजेन विषलिप्तं लाजं राज्ञे दत्वा तं जघान। वैरन्त्यं नाम वनवासिराजं देवी सपत्नीविरोधात् विषदिग्धेन नूपुरेण जघान। सौवीरराजं पत्नी विषदिग्धेन काञ्चीरत्नेन घातितवती। कुन्तले आयुधं गूढं कृत्वा विडूरथं नाम राजानं तत्पत्नी जघान। अतः राजा एतानी आपत्स्थानिनि परिहरेत्।

देवीनां सन्मार्गरक्षणे अपेक्षणीयाः नियमाः परिवाराश्च के इति निर्दिशति - मुण्डजटिलेत्यादिना। बौद्धभिक्षुक्षपणकादिभिः शैवपाशुपतादिभिः मायाप्रयोक्तृभिश्च देवीनां परिचयं वारयेत्। देवीबान्धवाश्च प्रसवव्याधिमरणकालादन्यस्मिन् काले देवीं न पश्येयुः। वेश्याः स्नानेन शुद्धदेहाः परिवर्तितवस्त्रालङ्काराश्च देवीनां परिचरणं कुर्युः। मातापितृसधर्माणः अशीतिवयस्काः पुरुषाः पञ्चाशद्वयस्काः स्त्रियः च वृद्धषण्डाभ्यागारिकाश्च अन्तःपुरस्त्रीणां शौचाशैचं परिशोधयेयुः, ताः राजहिते प्रतिष्ठेयुः च।

सपरिवारस्य राज्ञः स्थितिगतिव्यवहारेषु अनुष्ठनीयानि कार्याणि श्लोकद्वयाभ्यां संक्षिपति।

46. पदच्छेदः- स्वभूमौ च वसेत् सर्वः परभूमौ न सञ्चरेत् । न च बाह्येन संसर्गं कश्चित् आभ्यन्तरः व्रजेत्।

अन्वयः- सर्वः स्वभूमौ वसेत्। परभूमौ न सञ्चरेत्। आभ्यन्तरः कश्चित् बाह्येन संसर्गं न व्रजेत् च।

अर्थः- सर्वः देवीजनः अन्तःपुरजनश्च आत्मनः निश्चिते देशे एव वसेत्। अन्यस्य भूमौ न सञ्चरेत्। अन्तःपुरस्थः ~~न कस्चि~~दपि जनः बाह्यजनेने सह संसर्गं न गच्छेत्।

47. पदच्छेदः- सर्वं च अवेक्षितं द्रव्यं निबद्धागमनिर्गमं, निर्गच्छेत् अधिगच्छेत् वा मुद्रासङ्क्रान्तभूमिकम्।

अन्वयः- निबद्धागमनिर्गममं मुद्रासंक्रान्तभूमिकं सर्वं द्रव्यं अवेक्षितं निर्गच्छेत् अधिगच्छेत् वा।

अर्थः- अस्मात् स्थानात् आगतं अमुं स्थानं गच्छतीति पुस्तके मुद्रितागमनिर्गमं राजमुद्राभिः आगमननिर्गमनस्थानानि अङ्कितं च सर्वं धनं स्वयं हृष्टं सदेव निर्गमयेत् स्वीकुर्याद्वा।

विशोऽध्यायः समाप्तः।

# अष्टादशं प्रकरणं। आत्मरक्षितकम्।
## एकविंशोऽध्यायः।

राजपुत्ररक्षणप्रकरणे राज्ञः पुत्रदारेभ्यो रक्षणमुक्तम्। अत्र अस्मिन्नध्याये तदितरेभ्यो राज्ञः रक्षणमुच्यतेऊ शयनादिति।

शय्यायाः उत्थितः राजा धनुष्पाणिभिः स्त्रीगणैः परिवार्येतः ततः द्वितीयकक्ष्यायां कञ्चुकशिरस्त्राणधारिभिः षण्डैः अन्तःपुरकार्यचिन्तकैः च राजा परिवार्येत। तृतीयकक्ष्यायां कुब्जैः वामनैः म्लेच्छजातिभिश्च राजा परिवार्येत। चतुर्थकक्ष्यायां मन्त्रिभिः सम्बान्धिभिः कुन्तहस्तैः च परिगृह्येत। के राज्ञः अङ्गरक्षकाः भाव्याः इत्याह - पितृपैतामहेत्यादिना। परम्परया अनुगतं, महाकुलानुबन्धं कृतकृत्यं अनुरक्तं वृत्तकर्माणं च जनं अङ्गरक्षकं कुर्वित। वैदेशिकं अकृतार्थदानसत्कारं स्वदेशीयमपि वा पूर्वमपकृत्य परचात् स्वीकृतं वा जनं निकटस्थं अङ्गरक्षकं मा कुरु। अन्तःपुरस्थकञ्चुकादिसैन्यं राजानं अन्तःपुरं च रक्षेत्।

पाककर्मभोजनयोः परीक्षाक्रममाह - गुप्तेत्यादिना। पाकशालाध्यक्षः सुरक्षिते देशे सर्वं पाककर्म बहुवारमास्वाद्य कारयेत्। राजा एतत् एवं साधितं पक्वं भोजनं स्वयं अभ्यवहरणात् पूर्वं अग्नये पक्षिभ्यः च दत्वा प्रतिभुञ्जीत, कुत इति चेत् विषप्रतीकारार्थम्।

भोजने विषयुक्तत्वपरिक्षाक्रमं आह - अग्नेज्वालेत्यादिना। विषयुक्तस्य अन्नस्य संयोगे अग्नेः ज्वालाधूमयोः नीलत्वम् चटपटेति शब्दस्फोटनं च भवेत्। विषयुक्तान्नभक्षिणां पक्षिणां मरणं च सम्भवति। विषसंपृक्तस्य अन्नस्य बाष्पः मयूरकण्ठवत् मेचकवर्णयुक्तः भवेत्। आशु शैत्यं, करपिष्टस्येव वैरूप्यं, सोदकत्वं असम्यक् पाकत्वं च भवेत्। व्यञ्जनानां विषदिग्धत्वे शीघ्रशोषः, अग्निसंयोगात् तक्रादेरिव उत्क्वथनं, श्यामवर्णस्य फेनपटलस्य व्यञ्जनात् विभक्ततया स्थितिः, गन्धस्पर्शरसानां नाशः  च संजायते। द्रवेषु विषयक्ते षु तच्छाया हीना अतिरिक्ता वा स्यात्; फेनपटलदर्शनं विभागदर्शनं उपरिरेखादर्शनं च संजयेत। रसवस्तूनां विषयोगे मध्ये नीलराजिः, क्षीरस्य मध्ये ताम्रा शजिः, च भवति।आर्दद्रव्याणां अर्थात् आम्रदाडिमफलानां विषयोगे आशु म्लानत्वं अतिपक्वस्येव पूतीभावः तेषां रसे नीलिमा कपिशिमा वा भवेत्। शुष्कद्रव्याणां विषसंयोगे आशु चूर्णिभावः वैवर्ण्यं च जायते। कठिनवस्तूनां विषयोगे मृदुत्वं कठिनत्वं च जायते। विषसमीपगतानां क्षुद्रजीविनां मरणं भवेत्। आसनशयनकम्बलानां विवर्णमण्डलता भवद्विषयोगे। तथा तन्तूनां रोमाणां सूक्ष्मांशानां भ्रंशनं भवेत। सुवर्णदिलोहानां स्फटिकादीनां वस्तूनां विषदिग्धानां पङ्कमललिप्तता भवेत्। एतेषां स्निग्धगुरुत्वरागप्रभाववर्णस्पर्शतादयः गुणाः नष्टाः भवेयुः।

विषप्रयोत्कृपुरुषचिह्नानि निर्दिशति विषप्रदस्येति। विषप्रयोक्तुः मुखं शुष्ककपिशं वक्रं च भवत्। तस्य वाचि प्रतिबन्धः स्वेदः जृम्भा, तीक्ष्णः शरीरवेपथुः समे देशेऽपि स्वालित्यं येनकेनापि प्रकारेण उच्यमाने वाक्ये अवधानता, पारवश्यं, स्वकर्मणि स्वस्थाने च अनवस्थितिः च भवेत्। अतः विषहारिणः भिषजश्च राज्ञः समीपस्थाः स्युः। बैद्यः औषधहारिणः भिषजश्च राज्ञः समीपस्थाः स्युः। वैद्यः औषधशालातः स्वयमास्वाद्य निर्दोषमित्यवगतं औषधं गृहित्वा औषधपाचकोपदेष्टृभ्यां स्वयं च राजसमक्षं राज्ञे दद्यात्। मद्यं जलं च औषधस्य तथैव रीत्या शोधयित्वा देयम्।

राज्ञः क्षुरकाः, अलङ्कर्तारः स्नाताः शुद्धवस्त्राः शुद्धहस्ताः चं सन्तः मुद्राङ्कितं उपकरणं कञ्चुक्यादिभ्यो गृहीत्वा राजानं परिचरेयुः। स्नायनकारः, अङ्गमर्दकः आसनशयनकल्पकः रजकः, मालाकारः च तेषां कर्म सुपरीक्षितः एव कुर्युः। विषयोगशुद्धिबोधनार्थं वस्त्रमाल्यं आत्मचक्षुषि निधायैव राज्ञे दद्युः। तथा च स्नानानुलेपनसुगन्धद्रव्यण्यपि प्रथमं स्ववक्षोबाहुषु निवेश्यैव राज्ञे दद्युः। एवमुक्तेनैव परदेशादागतानां वस्तूनां च कार्यं प्रतिपादितम्।

नटनर्तकाः आयुधवह्नि. विषाणि वर्जयित्वा एव राज्ञः समीपं नर्म दर्शयेयुः। एषां नटनर्तकानां वाद्यानि राज्ञः भवनस्य आभ्यन्तरे एव तिष्ठेयुः। तथा अश्वनां, स्थानां, गजानां अलङ्काराश्च राजभवनाभ्यन्तरे एव तिष्ठेयुः।

अथ राज्ञः यानाद्यारोहणे अवधानता ससहायता च विवृणोति। मौलपुरुषेत्यादिना। विश्वस्तप्रधानपुरुषाधिष्ठितं वाहनं राजा अरोहेत्। विश्वस्तनाविकाधिक्षितां नावं च आरोहेत्। अन्यस्यां नावि सूत्रबद्धां, वातायत्तगमनां नावं च राजा न आरोहेत्। राज्ञः नौयानवेलायां जलसमीपे सैन्यं तिष्ठेत्। कैवर्तपरिशीथिते जलाशये एव अर्थात् तिमिनक्रादिहिंस्रजन्तुरहिते जलाशये एव राजा गच्छेत्। तथा च सर्पग्राहिभिः परिशोध्य अङ्गीकृतं उद्यानं राजा प्रविशेत्।

व्याधैः श्वगणजीविभिश्च निरस्तचोरव्याघ्राद्युपद्रवभयं मृगायारण्यं प्रविशेत् राजा। तथा विश्वस्तायुधधारिभिः परिवृत एव राजा सिद्धतापसं पश्येत्। मन्त्रिपरिषदा परिवृत एव सामन्तराजस्य दूतं संपश्येत्। युद्धोचितवेष एव सन् राजा अश्वं हस्तिनं रथं वा आरूढः युद्धसज्जं सैन्यं अभिगच्छेत्। देशान्तरगमने राजधानीप्रवेशे च राजमार्गस्य उभयपार्श्वः वेत्रिभिःकृतरक्षं शस्त्रिभिः संन्यासिभिः अङ्कविहीनैश्च विराहितं च भवेत्। जनसङ्कुलं देशं राजा न प्रविशेत्। यात्रासु, समाजेषु, उत्सवेषु, उद्यानभोजनदिषु राजा दशभटनायकाधिष्ठितेन एव गच्छेत्।

48. पदच्छेदः- तथा च योगपुरुषैः अन्यान् राजा अधितिष्ठति। तथा अयं अन्यबाधेभ्यः रक्षेत् आत्मानं आत्मवान्।

अन्वयः- यथा अयं राजा योगपुरुषैः अन्यान् अधितिष्ठति तथा अन्यबाधेभ्यः आत्मानं आत्मवान रक्षेत्।

अर्थः- यथा विजिगीषुः अयं राजा कापाटिकादिभिः गूढपुरुषैः अन्यान् बाधते तथा अन्यबाधेभ्यः योगपुरुषोपद्रवेभ्यः आत्मानं प्रयत्नवान् संरक्षेत्।

एकाविशोध्यायः समाप्तः।

प्रथममधिकरणं समाप्तम्।